(२) " साम-व्यतिरिक्तेषु श्रुति-द्वयमेव वर्तते, इत्याह—' दीप्तामुदात्ते जानीयात्० ।' गान्धर्वे **गाने श्रुतेरभावे**ऽपि तत्सदृशः स्वरः कार्यः । ' स्वर-सम्पदः ।' एतावद् गानादि-विषये उदात्तादयस्त्रयः केनचिद् विशेषेण पञ्चत्वेनोच्यते ॥ १८ ॥ "

अर्थः—उदात्त स्वर की श्रुति ' दीप्ता ' एवं अनुदात्त की ' मृदु ' होती है । साम-गान से भिन्न अन्य गायन में श्रुतियों का अभाव होता है, वहाँ दीप्ता एवं मृदु श्रुतियों के समान उदात्तादि तीन स्वर विशेष अवस्था में पाँच तक माने गये हैं ।

iv **नारद** द्वारा कही हुई उपर्युक्त सामिक श्रुतियों की योजना देखने से प्रतीत होता है, कि:—

(१) सामिक दीप्तादि श्रुतियों के प्रयोग का संबंध प्रथमादि स्वरों के क्रम तथा स्वर-संधि के साथ था ।

(२) साम-गायन में विशिष्ट स्वरोच्चार-रूप दीप्तादि पाँच श्रुतियों का ही प्रयोग अभीष्ट था, अतः श्रुतियों की संख्या पाँच ही थी ।

(३) सामयुग के पश्चात् संगीतशास्त्रकारों ने सामिक श्रुतियों को श्रुति-जाति में परिवर्तित किया एवं उन्हें षड्जादि सप्तस्वरों में चार, तीन इत्यादि संख्या द्वारा वितरित किया ।

(४) सामिक पाँच श्रुतियों की संख्या संगीतशास्त्रकारों ने बाईस करा ली।

(५) साम-गायन में प्रयोज्य श्रुति विशिष्ट स्वरोच्चार के रूप में थी; संगीत-शास्त्रकारों ने उन्हीं श्रुतियों को सूक्ष्म स्वरान्तरविभाग के रूप में परिवर्तित करा लीं ।

संगीतशास्त्रान्तर्गत **'श्रुति' के विकास का इतिहास** इन्हीं तथ्यों पर आधारित है ।

['आयतत्वं तु चेन्नीचे' इत्यादि श्लोक नारदी शिक्षा का है एवं साम-गान से संबंधित है, यह बात ज्ञात नहीं होने से, इस श्लोक का अर्थ कतिपय विद्वानों ने विपर्यस्त किया है । एक पंडितमहोदय ने लिखा है:—

"मेरु से नीचे की ओर जितना जायंगे, स्वरों में उतनी ही उच्चता आती जायेगी। दारवी वीणा की इसी स्थिति को समक्ष रखते हुए नाट्यशास्त्र में कहा गया है:—'आयतत्वं तु चेन्नीचे'० अर्थात् "नीचे की स्थिति में श्रुति का आयतत्व होता है" इत्यादि ।

वास्तव में देखा जाय तो, 'आयतत्वं तु चेन्नीचे०' इत्यादि नाट्यशास्त्र में आया हुआ श्लोक प्रक्षिप्त होना चाहिए, क्यों कि यह श्लोक अलंकार-विषय में बीच में अचानक आया है, अर्थात् पूर्वापर-संबद्ध नहीं है। तदुपरान्त 'आयता, मृदु' इत्यादि श्रुति-जातियों का निर्देश तक नाट्यशास्त्र में कहाँ भी उपलब्ध नहीं है ।

'मार्दव' तथा 'आयतत्व' संज्ञाएँ **ना० शा०** में श्रुतिनिदर्शन—प्रकरण में (१८।२६) आयी हैं तथा 'मार्दव' और 'उत्कर्ष' शब्द द्विविधैक-मूर्च्छना-सिद्धि-प्रकरण में उपलब्ध हैं (२८।२७)। 'शैथिल्य' तथा 'आयत' संज्ञाएँ पखवाज-वादन के प्रकरण में आयी हैं:—

'शैथिल्यादायतत्वाच्च स्वरे गाम्भीर्यमिष्यते' ॥ ३४।२६ ॥

'शैथिल्यादायतत्वाच्च चर्मस्फोटनयाऽपि च ।
स्वराणां सम्भवः कार्यो मार्जनासु प्रयोक्तृभिः' ॥ ११२ ॥

'मार्जना' अर्थात् पखवाज आदि चर्मवाद्य विशिष्ट स्वरों में लगाना। 'मार्दव' का पर्याय 'शैथिल्य' इन श्लोकों में प्रयुक्त हुआ है । श्रुति-निदर्शन एवं द्विविधैक-मूर्च्छना-सिद्धि के प्रकरण में प्रयुक्त 'अपकर्ष' तथा 'उत्कर्ष'

कथ्यन्ते नामतः।

तीव्रा कुमुद्वती मन्दा छन्दोवत्यपरा स्मृता।
तथा दयावती प्रोक्ता रञ्जनी रतिका[1] तथा॥ ९३॥
रौद्री क्रोधा तथा[2] वज्री, ततश्चैव प्रसारिणी।
प्रीतिश्च मार्जनी चैव क्षिती रक्ता ततः पुनः॥ ९४॥
तथा सन्दीपनी प्रोक्ता तथैवाऽऽलापिनीति च।
मदन्ती रोहिणी रम्या तथोग्रा क्षोभिणी ह्यपि॥ ९५॥
षड्जादिषु क्रमादेता यावत्यो यत्र संश्रिताः।
श्रुतयः सम्यगधुना तदत्र परिकीर्त्यते॥ ९६॥
स्मृतौ निषादगान्धारौ द्विश्रुती श्रुतिवेदिभिः।
ऋषभो धैवतश्चैव त्रिश्रुती परिकीर्तितौ॥ ९७॥
ते चतुःश्रुतिकाः प्रोक्ताः षड्जमध्यम-पञ्चमाः।
दीप्ताऽऽयता मृदुर्मध्या षड्जे श्रुतिचतुष्टयम्॥ ९८॥
करुणा मध्या मृदुश्चेति तिस्रस्तु ऋषभे मताः।
दीप्ताऽऽयता च गान्धारे मध्यमाख्ये स्वरे पुनः॥ ९९॥
दीप्ताऽऽयता मृदुर्मध्या चतस्रः श्रुतयो मताः।
मृदु-मध्याऽऽयताख्याश्च पञ्चमे करुणा तथा॥ १००॥
करुणाऽऽयता च मध्या च धैवतेऽपि श्रुतित्रयम्।
दीप्ता मध्या निषादेऽपि षड्जग्रामे श्रुतिक्रमः॥ १०१॥

शब्द 'मार्दव' तथा 'आयतत्व' के पर्यायरूप स्पष्ट हैं। भरतकालीन वीणाएँ हार्प-सदृश थीं, अतः इस वीणाओं के एवं पखवाज के स्वरों को उतार-चढाने की क्रिया एकसमान थी और इस प्रकार के उतार-चढाव के लिए भरतमुनि ने 'मार्दव' और 'आयतत्व' शब्दों का प्रयोग किया है।]

M: १ रक्तिका २ तथावज्री

F: (९५–१०१) R १।३।२७–३१

चतुर्धा नाम दीप्तायास्तीव्रा रौद्री च वज्रिका ।
उग्रा भेदाश्च विज्ञेया नाना-स्वर-प्रभेदतः ॥ १०२ ॥
कुमुद्वती च क्रोधा च तृतीया तु प्रसारिणी ।
सन्दीपनी रोहिणी चेत्यायता पञ्चधा स्मृता ॥ १०३ ॥
दयावती तथाऽऽला[1]पिन्यभिधा च मदन्तिका ।
करुणा -[2]- त्रिविधा ज्ञेया स्वर-त्रय-समाश्रया ॥ १०४ ॥
मृद्वी चतुर्धा विज्ञेया मन्दाख्या र[3]तिका तथा ।
प्रीतिः क्षितिरिति प्रायश्चतुःस्वर-समाश्रया ॥ १०५ ॥

टीकाः— (१०२–११३) i. समश्रुतिक संवादी स्वरों की श्रुतिजाति की तुलना करने पर वस्तुस्थिति दृष्टिगोचर हो सकती है:—

१	२	३	४			१	२	३	
×	×	×	×			×	×	×	
दी०	आ०	मृ०	मध्या	= ष०]	[	क०	म०	मृद्वी	= ऋ०
दी०	आ०	मृ०	मध्या	= म०]	[	क०	आ०	मध्या	= धै०
मृ०	म०	आ०	करुणा	= प०]					

१	२	
×	×	
दी०	आयता	= गा०
दी०	मध्या	= नि०

उपर्युक्त तालिका पर दृष्टिपात करने से विदित होगा, कि षड्ज एवं मध्यम की श्रुतिजातियाँ तथा उनका क्रम दोनों ही समान हैं, परंतु अन्य समश्रुतिक स्वरों की श्रुतिजातियाँ समान नहीं हैं । सारांश, स्वरों की स्वस्थानस्थ स्थिति, कोमल-तीव्रत्व या 'तर-तीव्रा' दि सूक्ष्मविकृतियों का संबंध अथवा कार्यकारणभाव स्वरों की तत्तत्-श्रुतिजाति से लगाना असंभव है । षड्ज, मध्यम, धैवत एवं निषाद 'मध्या' श्रुतिजाति पर स्थित है; किन्तु ऋषभ 'मृद्वी' पर, गान्धार 'आयता' पर तथा पंचम 'करुणा' पर स्थित है । ऋषभ एवं धैवत की प्रथम श्रुति की जाति करुणा है । तात्पर्य स्वरस्थ श्रुतियों की जाति-व्यवस्था में कुछ हेतुपूर्ण योजना थी, ऐसा प्रतीत नहीं होता ।

M: १ मायिन्याभिव २ वक्र ३ रक्तिका

मध्याऽपि षड्विधा छन्दोवत्याख्या रञ्जनी तथा ।
मार्जनी चैव रक्ता च रम्या च क्षोभिणीत्यपि ॥ १०६ ॥
षड्जे तीव्रा च दीप्ताया आयतायाः कुमुद्वती ।
मृदोर्मन्दा तु मध्यायाः स्मृता छन्दोवतीति च ॥ १०७ ॥

ii. श्रुतियों के नाम तथा जातियाँ नान्यभूपाल के ग्रन्थ में ही सर्वप्रथम पायी जाती हैं ।

iii. श्रुतियों के 'कुमुद्वती', 'वज्रिका', 'प्रसारिणी', 'क्षिति' इत्यादि नाम स्पष्टतः काल्पनिक हैं ।

iv. 'श्रुति' शब्द प्रचलित संगीत में अतिकोमलादि स्वरविशेष के अर्थ में प्रसिद्ध है । भरत, मतंग तथा रत्नाकर के ग्रन्थों में 'श्रुति' शब्द इस अर्थ में प्रयुक्त नहीं हुआ है ।

v. 'श्रुति' का यह विशिष्ट अर्थ रत्नाकर-पश्चात् उसके टीकाकारों के लिखने से प्रचलित हुआ हो, ऐसा प्रतीत होता है । इस अर्थ का संकेत सर्वप्रथम **सिंहभूपाल** की टीका में पाया जाता है:—

'ननु किं श्रुति-जाति-निरूपणेन प्रयोजनम्? उच्यते— तत्तज्जातिकां श्रुतिं श्रुत्वा मनसो नामसाम्येन तथा तथा विकार उत्पद्यत इति सूचयितुं श्रुति-जाति-निरूपणम् । ततश्च 'दीप्तां' श्रुतिमाकर्ण्य मनसो दीप्तत्वमिव भवति; 'आयतां' श्रुतिमाकर्ण्याऽऽयतत्वमिव । एवं करुणत्वादि ज्ञातव्यम् ॥'

(सं० र० १।३।२५-२८ सिं०)

इसी कथन का अनुवाद **कल्लिनाथ** ने किया है:—

"श्रुतीनामन्योऽन्यमसंकीर्णतया स्वरूप-परिज्ञानाय क्वचित्तासां साजात्येन संगत्या रक्तिलाभाय चावान्तर-भेद-सहितानां स्वरेषु व्यवस्थानं दर्शयति— 'दीप्ताऽऽयता' इत्यादिना ।"

कल्लिनाथ के उपरोक्त प्रतिपादन में उसने 'क्वचित्' शब्द प्रयुक्त किया है, उससे प्रतीत होता है कि श्रुतियों के जाति-नामों के विषय में वह निःशंक तो नहीं था ।

प्रचलित तर-तीव्रादि स्वरों की कल्पना सिंहभूपाल के निम्नोद्धृत वचन से पैदा हुई होंगी, ऐसा अनुमान लगा सकते हैं:—

"......तत्र मन्द-तीव्र-तीव्रतरादि-तारतम्याख्य-विरुद्ध-धर्म-संसर्गस्य विद्यमानत्वाद् भेदस्तावत्सिद्धः ।" (१।३। ९–८)

M: १ षाड्ज २ म्योपनया

F: (१०२–१०६) R: १।३।३१–३५

करुणा-मध्या-[1]मृद्वीनामृषभेऽपि यथाक्रमम् ।
दयावती [2]रञ्जनी च नाम स्याद् [3]रतिकाऽपि च ॥ १०८ ॥
गान्धारेऽपि च दीप्ताया आयताया अपि क्रमात् ।
रौद्री क्रोधा च नामेति द्वितयं समुदीरितम् ॥ १०९ ॥

किन्तु रत्नाकर जैसे मर्मज्ञ ग्रंथकार ने इस विषय की ओर किंचित् भी इङ्गित नहीं किया, यह बात विचारणीय है ।

vi. पं० **अहोबल** ने श्रुतियों के संबंध में कुछ नवीन कल्पनाएँ प्रस्तुत की हैं, उनका आधार भी प्रचलित श्रुतिवाद निर्माण होने में सहायभूत हुआ होगा । पं० अहोबल का कथन निम्नानुसार है:—

"श्रुतयः स्युः स्वराभिन्नाः श्रावणत्वेन हेतुना ।
अहि-कुण्डलवत्तत्र भेदोक्तिः शास्त्र-सम्मता ॥ ३८ ॥
सर्वाश्च श्रुतयस्तत्तद् रागेषु स्वरतां गताः ।
रागहेतुत्व एतासां श्रुति-संज्ञैव सम्मता ॥ ३९ ॥
केशाग्र-व्यवधानेन बह्व्योऽपि श्रुतयः श्रिताः ।
वीणायाञ्च तथा गात्रे संगीत-ज्ञानिनां मते ॥ ४० ॥
मध्ये पूर्वोत्तराबद्ध-वीणायां गात्र एव च ।
षड्ज-पञ्चम-भावेन श्रुतीर्द्वाविंशतिं जगुः ॥ ४१ ॥
....तासां नामानि वक्ष्येऽहं **नारदीया**नुसारतः ॥ ४२ ॥
स्वर-स्थाने क्रिया-भेदाद् वैचित्र्यं जायते बहु ।
जाति-भेद-समव्याप्यं यत्तज्ज्ञेयं मनीषिभिः ॥ ४३ ॥
इक्षु-क्षीर-गतं यद्वन्माधुर्यं नोच्यते बुधैः ।
तद्वत् श्रुतिगता जातिर्वाचा को वा वदिष्यति ? ॥ ६० ॥
श्रोत्र-प्रत्यक्ष-सिद्धास्ताः भिन्न-श्रुति-समाश्रिताः ।
तद्वच्छ्रुति-गता जातिरन्वर्थ-नामका भवेत् ॥ ६१ ॥
....श्रुत्यनन्तरमुत्पन्नाः स्निग्धानुरणनात्मकाः ॥ ६२ ॥
रञ्जयन्ति स्वतः स्वान्तं श्रोतॄणामिति ते स्वराः ॥"

पं० अहोबल के प्रतिपादन का सारांश निम्ननिर्दिष्ट है:—

"(१) श्रुतियाँ स्वरों से अभिन्न हैं ।

(२) प्रत्येक श्रुति किसी न किसी राग में स्वर बन जाती है । श्रुतियाँ रागोत्पत्ति का कारण है ।

(३) केशाग्र जैसे सूक्ष्म अन्तर पर श्रुतियाँ असंख्य होती हैं ।

M: १ सुधी– २ रंजिका ३ रंलिका

मध्यमे च क्रमाद्दीप्ताऽऽयतयोर्मृदु-मध्ययोः ।
वज्रिकाऽथ प्रसारिणी प्रीतिर्मार्जनिकेति च ॥ ११० ॥
मृदु-मध्याऽऽयताख्यानां करुणायाश्च पञ्चमे ।
क्षितिरक्ते तथा सन्दीपनी चालापिनी तथा ॥ १११ ॥

---

(४) षड्ज-पंचम-भाव द्वारा २२ श्रुतियाँ होती हैं। जिनके नाम नारद के मत से दे रहे हैं।


(५) क्रिया-भेद के कारण स्वर-स्थानों में वैचित्र्य पैदा होता है; श्रुतियों की दीप्तादि जातियाँ निर्माण होने में यही वैचित्र्य कारणीभूत है। उसी प्रकार श्रुति-गत जातियों का वर्णन करना भी असम्भव है, जिस प्रकार ईख और दूध के माधुर्य का भिन्नत्व कथन करना अशक्य है। किन्तु श्रुतियों की दीप्तादि जातियाँ श्रवण-प्रत्यक्ष हैं एवं अपने नाम के अनुसार भाव निर्माण करती हैं।

(६) स्वर अनुरणनात्मक और स्वयं रंजक होता है, जो श्रुति के पश्चात् उत्पन्न होता है।"

पं० अहोबल का उपर्युक्त प्रतिपादन बहुत ही सुंदर है। उसमें हमारे गायक-वादकों की विचारप्रणाली का प्रतिबिंब निहित है। पं० अहोबलोक्त श्रुति-सिद्धान्त इसी कारण से आधुनिक जैसा प्रतीत होता है। पं० अहोबल की इस विचार-धारा ने प्रचलित श्रुतिसिद्धान्तों को जन्म दिया है, किन्तु सूक्ष्मावलोकन करने पर स्पष्ट होगा, कि पं० अहोबल के उपर्युक्त श्रुति-सिद्धान्तों की पुष्टि प्राचीन ग्रन्थकारों द्वारा किस हद तक होती है। अहोबल द्वारा उपर्युक्त दोनों सिद्धान्त महत्त्व के हैं, अतः इनका परीक्षण करना यहाँ आवश्यक है:—

उपरोक्त कं० (२) में प्रत्येक श्रुति रागों में स्वरत्व प्राप्त करती है, ऐसा कहा है; तथापि:—

(अ) भरतोक्त तथा रत्नाकरोक्त शुद्ध-विकृत स्वरों को सम्मिलित करने के बाद भी जो कतिपय श्रुतियाँ स्वरत्व-रहित ही रहती हैं, वे निम्ननिर्दिष्ट हैं:—



धैवते करुणाऽऽयता-मध्यानां च यथाक्रमम् ।
मंदन्ता[2] रोहिणी रम्या त्रीणि नामानि यानि ते ॥ ११२ ॥
निषादे च तथा दीप्ता-मध्या-श्रुत्योरनुक्रमात् ।
उग्रा च क्षोभिणी चैव नामद्वितयमीरितम् ॥ ११३ ॥

इस कोष्ठक को देखने से विदित होगा कि षड्ज से परवर्ती दो श्रुतियाँ, ऋषभ-परवर्ती एक श्रुति, मध्यम और पंचम की आगे की दो दो श्रुतियाँ तथा धैवत पश्चात् की एक श्रुति स्वरत्व प्राप्त नहीं करती।

(इ) श्रुतिपंडितों के प्रतिपादन के अनुसार मूर्च्छनाओं (modes) द्वारा बहुतांश श्रुतियाँ स्वरत्व प्राप्त कर लेती हैं; परन्तु षड्ज की पूर्ववर्ती तथा परवर्ती एक-एक श्रुति स्वरत्व से फिर भी वंचित ही रह जाती है। तात्पर्य, किसी न किसी राग में प्रत्येक श्रुति स्वर बन जाती है, इस प्रकार का अहोबल का विधान सत्य नहीं है। इस विषय में दत्तिल का वचन 'तेभ्यः कांश्चिदुपादाय गीयन्ते सर्व-गीतिषु' (द० १०) निर्णायक है।

(उ) षड्ज की पूर्ववर्ती चार श्रुतियाँ स्वर में रूपान्तरित हो जाने पर 'मृदु' आदि चार प्रकार के षड्ज विशिष्ट भाव के व्यञ्जक पैदा होते हैं, ऐसा अहोबल ने कहा है:—

'सत्यं षड्जश्चतुर्धा स्यान्मृदुत्वादि-विशेषणैः ।
तत्तज्जाति-विशिष्टत्वान्नान्यथा सिद्धिरञ्जसा ॥४९॥'

इस विवेचन के अनुसार दीप्त, आयत, मृदु एवं मध्य ऐसे चार प्रकार के षड्ज बन जायँगे तथा उनके उक्त नामसदृश भाव भी प्रकट होंगे।

(क) किन्तु अहोबल ने अपने स्वरों का बयान करते समय उनके 'जाति'-भेदों का त्याग करते हुए पूर्व, कोमल, तीव्र, तीव्रतर इत्यादि स्वर-संज्ञाओं का स्वीकार किया है, कारण कि उसको अपने समय के साथ चलना था।

कं० (३) तथा (४) में केशाग्र परिमाण द्वारा अनंत श्रुतियों की संभावना दर्शाते हुए भी कं० (४) के अनुसार षड्ज-पंचम-भाव-जनित २२ श्रुतियाँ स्वीकृत की हैं। षड्ज-पंचम-भाव-जन्य श्रुतियों के सम्बन्ध में आगे विचार करेंगे। परन्तु, यहाँ इतना ही कहना प्रर्याप्त होगा कि पंचम-भावी सप्त स्वर यही **पायथेगोरियन्** सप्तक है। अहोबल का कहना है कि यह श्रुतिनाम उन्होंने नारद के मतानुसार दिये हैं; किन्तु **ना० शि०** में वे उपलब्ध नहीं हैं। इससे ज्ञात होता है कि अहोबल ने अपने पूर्ववर्ती श्रुतिवादप्रिय ग्रन्थकारों का अनुकरण करने की दृष्टि से ही 'पूर्व' 'अतिकोमल' इत्यादि स्वरों की कल्पना जुटाई है।

M: १ मृद्वीमां २ मंदयंती

६ अथ षष्ठं श्रुति-लोप-गणना-प्रकरणम्

लुप्यते यः स्वरश्चात्र षाडवे यदि वौडवे।
ज्ञेयस्तु श्रुति-संसर्गे श्रुति-लोपस्तथा बुधैः॥ ११४॥
गान्धारेण निषादेन विहीनः षाडवो यदा।
गेय-स्वरेषु जायन्ते श्रुतयो विंशतिस्तथा[1]॥ ११५॥
ऋषभेण विहीनश्च धैवतेनाथ षाडवः।
ततः शेष-स्वरेषु स्युः श्रुतयस्तत्र विंशतिः॥ ११६॥
षड्जेन पञ्चमेनाथ विहीनः षाडवो यदा।
°(तदा शेष-स्वरेष्वेव श्रुतयोऽष्टादश स्मृताः)॥ ११७॥
औडवितं च निषाद-गान्धार-रहिते यदि।
अष्टादशैव श्रुतयः स्मृताः शेष-स्वरेष्वथ॥ ११८॥
गान्धारर्षभ-हीने च त्यक्त-गान्धार-धैवते।
औडविते तु श्रुतयो बुधैस्तत्र दश स्मृताः॥ ११९॥
षड्ज-गान्धार-हीने तु षड्ज-निषाद-वर्जिते।
धैवतर्षभ-हीने च त्यक्त-गान्धार-पञ्चमे॥ १२०॥
निषाद-पञ्चमोपेताः श्रुतयः षोडश स्मृताः।
षड्जर्षभ-विहीने च षड्ज-धैवत-वर्जिते॥ १२१॥
पञ्चमर्षभ-हीने[2] च त्यक्त-धैवत-पञ्चमे।
औडवितेऽथ[3] श्रुतयो बुधैः पञ्चदश स्मृताः॥ १२२॥
षड्ज-पञ्चम-हीने तु ....।
°(चतुर्दश) श्रुतयस्ततः शेषस्वरेष्विति॥ १२३॥

टी०:—(११४–१३३) वर्ज्य स्वर की श्रुतियाँ भी वर्जित होती हैं, इस प्रकार की कल्पना नान्यदेव द्वारा उपर्युक्त श्लोकों में प्रस्तुत की गयी है, जो अनावश्यक प्रतीत होती है।

M: १ वञ्रिते २ पञ्चमहीने च तथा ३ औडवेति

ग्रामे तु मध्यमे[1] हीनो गनीभ्यां षाडवो यदा ।
पूर्ववद् विंशतिः शेष-स्वरेषु श्रुतयः स्मृताः ॥ १२४ ॥

रिपाभ्यां च परित्यक्तौ जायेते यदि षाडवौ ।
एकोन[2]विंशतिः शेष-स्वरेषु श्रुतयो मताः ॥ १२५ ॥

ध-सा-भ्यां यद्विहीनं च षाडव-द्वितयं यदि ।
ग[3]-नि-हीनौडवं चे[4]त्स्यात्तदाऽष्टादश ताः स्मृताः ॥१२६॥

रि-ग-हीने °(रि-नि-हीने) प[5]-नि-हीने प-गातिगे ।
औडवे श्रुतयः सप्तदशैव परिकीर्तिताः ॥ १२७ ॥

प[6]-रि-हीने ध-नि-हीने °(स-नि-हीने) ध[7]-गातिगे ।
स-ग-हीने त्वौडविते षोडश श्रुतयः स्मृताः ॥ १२८ ॥

ध-रि-हीने स[8]-रि-हीने प-ध-त्यक्ते प-सातिगे ।
औडविते मता पञ्चदशैव श्रुतयः सदा ॥ १२९ ॥

स-ध-हीनौडवे शेषाः श्रुतयस्तु चतुर्दश ॥ १३० ॥

स- - - परित्यक्तं नि-ग-हीनं प-रि-च्युतम् ।
त्यक्तेतराणि सर्वाणि स्युर्यान्यौडवितानि तु ॥ १३१ ॥

ध- - - षाडवश्चैको (?) गान्धारग्राम-सम्भवाः ।
ते षड्जग्राम एवोक्ताः श्रुति-संख्यान-संनिभाः ॥१३२॥

षाडवौडवकारी तु यत्र यो यः स्वरः स्मृतः ।
तस्य तस्य श्रुतिस्तत्र लुप्यते नेतरा क्वचित् ॥ १३३ ॥

स्प०—(११४-१३३) ये श्लोक जात्यध्याय (अ० ६) के प्रारम्भ में प० ६८—६९ पर आये हैं, जो क्रमौचित्य के कारण इस स्थान पर समाविष्ट किये हैं ।

M: १ मध्यम-हीने तु चेत् षाडवौडवितः २ भेदो- ३ रिगहीनौ ४ धास्या ५ परिहीने ६ पति- ७ निगा- ८ गिरिहीने

७. अथ सप्तमं श्रुति-रस-विनियोग-प्रकरणम्

°(अथ श्रुतीणां रसेषु विनियोगो, यथा :—)

हास्य-शृङ्गारयोर्दीप्ता श्रुतिर्भरत-सम्मता ।
आयता चापि कर्तव्या वीर-रौद्राद्भुतेषु च ॥ १३४ ॥

करुणा हि श्रुतिः प्रोक्ता बीभत्से सभयानके ।
मृदुर्मध्या च सर्वेषु रसेषु विनियुज्यते ॥ १३५ ॥

टी०:—(१३४–१३५) i श्रुतिजातियों के रसों का विवेचन **ना० शा०** में उपलब्ध नहीं है।

ii. श्रुतिजाति दीप्तादि का विवेचन भी **ना० शा०** में नहीं है । 'श्रुतयोऽन्या द्वितीयस्य मृदुमध्याऽयताः स्मृताः । ....मृदुमध्यमयोस्तथा ।' इत्यादि दो श्लोक **ना० शा०** [२९ । ३५–४०] में आये हैं, वे प्रक्षिप्त होने चाहिए, जैसा पहले बतलाया गया है ।

iii श्लोक १३५ में 'करुणा' श्रुतिजाति बीभत्स और भयानक रसों का परिणाम करनेवाली कही है, एवं 'मृदु' सभी रसों में व्याप्त होनेवाली कही है । यह व्यवस्था समुचित प्रतीत नहीं होती; कारण पंचम की श्रुति की जाति करुणा है, एवं पंचम स्वर शृङ्गार-हास्य का अभिव्यंजक कहा है । इसके अतिरिक्त ऋषभ और धैवत की प्रथम श्रुति की जाति करुणा है, किन्तु ये श्रुतियाँ संगीत में अनुपयुक्त रहती हैं, कारण कि वे कभी भी स्वर का रूप धारण नहीं करती; यही अवस्था ऋषभ-धैवत की द्वितीय श्रुति 'मध्या', 'आयता' एवं गान्धार-निषाद की प्रथम श्रुति 'दीप्ता' की है । तात्पर्य श्रुतिजाति के करुणा आदि नाम तथा उन नामों से संबद्ध अथवा सूचित होनेवाली रसाभिव्यक्ति काल्पनिक ही माननी पडेगी ! कतिपय श्रुतिपंडित भरतोक्त स्वर-रस-व्यवस्था को मूर्च्छना द्वारा प्रचलित हिंदुस्तानी रागों में बलात् निहित करते हैं एवं उक्त काल्पनिक आधार पर काफी, भैरवी जैसे शृंगार तथा करुण रसवाले रागों द्वारा घृणास्पद रसभावों के निर्माण की अपेक्षा करते हैं !

८. अथाष्टमं स्वर-साधारण-प्रकरणम्

अथ काकल्यन्तरौ स्वरौ :—

षड्जं स्वरं परित्यज्य श्रुतिरेका यदा व्रजेत् ।
स्वरं निषादं स तदा काकलीत्यभिधीयते ॥ १३६ ॥
[1]मध्यमं च परित्यज्य श्रुतिरेका यदा [2]व्रजेत् ।
गान्धारं स तदा तज्ज्ञैरन्तर-स्वर उच्यते ॥ १३७ ॥
[षड्जं स्वरं परित्यज्य मृदुर्मन्दाऽभिधा व्रजेत् ।
°(स्वरं निषादं स तदा काकली-)-त्यभिधीयते ॥१३८॥
तस्यैव हि तु मन्दाया याति-[3]-तीव्राऽभिधा यदा ।
ऋषभं; द्विश्रुतिः षड्जः, स्वर-साधारणं तदा ॥ १३९ ॥
[4]मध्यमं च परित्यज्य मृदुः प्रीत्यभिधा यदा ।
गान्धारमेति; स तदा चान्तरः स्वर उच्यते ॥ १४० ॥]
[5]मध्यमस्य यदा [6]गच्छेद्दीप्ताख्या वज्रिकाऽभिधा ।
[7]पञ्चमं च [8]तदा ज्ञेयं स्वर-साधारणं तथा ॥ १४१ ॥
एवं मध्यम-[9]षड्जाख्य ग्रामयो[10]रुभयोरपि ।
काकल्यन्तर-योगेन स्वर-साधारणेऽपि च ॥ १४२ ॥
साधारणं तद्द्विविधं जातिकृतं स्वरकृतं [11]च ।
यत्रो[12]भयोर्जात्योर्ग्रहांशापन्[13]यासादीना[14]मे[15]केनात्मकेन वा—
ध........ णो (?) [16]यांवज्जातिरिव जातिरुत्पद्यते ।
तत्र जाति-साधारणमित्युच्यते ॥ १४३ ॥

टी० :—(१३६-१४२) श्लो० १३८-१४१ में अंतर-काकली का एवं ऋषभ-पंचम का वर्णन पृथक् पृथक् दिया है; किन्तु आगे आनेवाले वाक्य क्र० १४४, १४५ देखने से ज्ञात होगा, कि उक्त वर्णन ग्राम-साधारण त्रिश्रुतिक गान्धार-निषाद का है ।

स्प० —i. श्लो० १३६ और १३७ MS. में क्रमाङ्क ६२ तथा ६३ के हैं ।
ii यही श्लोक प० ६८ पर पुनरुक्त हैं, जो ऊपर १३८ से १४० तक दिये हैं ।

M: १ पञ्चमं २ भवेत् ३ तितिवा ४ पञ्चमं ५ एता चैव ६ गच्छेदी ७ गान्धाराख्या ८ थच ९ गान्धार १० र- ११ वा १२ भी १३ त्या १४ तां १५ म १६ यवद्रत्येव

यदा च षड्[1]जस्य श्रुतिचतुष्कादेकां श्रुतिं निषाद, इतरां चर्ष[2]भ आश्रयति, तदा निषादः काकली-संज्ञो भवति । ऋषभश्च स्वर-साधारणतया साधारण-संज्ञो भवति ॥ १४४ ॥

यदा च मध्यमस्य श्रुतिचतुष्का[3]देकां श्रुतिं °(गान्धार) आश्रयति, इतरां च[4] पं[5]चमस्तदा गान्धारो[6]ऽन्तर-संज्ञो भवति । पँ[7]चमश्चर्षभ[8]र्वच्छ्रुति-साधारण इति ॥ १४५ ॥

एवं मध्यमग्रामेऽपि मध्यमस्य श्रुतिचतुष्का[9]देकैकां श्रुतिमाश्रयन्[10]तावेतावेव काकल्यन्तरौ[11], स्वर-साधारणौ[12]श्च भवति ॥ १४६ ॥

एवं गान्धार-ग्रामेऽपि न चैवैते........ । एतेषामल्पे स्वरे........त्योऽल्पत्वं (?) नापि षड्[13]ज-धैवत-मध्यम-गान्धारा अल्पा[14] एव भवन्ति ॥ १४७ ॥

यतः कट्वम्लादि-रसादीनां क्षार-सम-भुजोऽपि सन्, ...ते (?)....रन्यान्य सप्तमो नास्तीति व्यवहारो........च कुत्रचित् ॥ १४८ ॥

टी०ः—(१४४-१५२) i. भरतमुनि ने साधारण-संज्ञावाले दो विकृत स्वर कहे हैं:—अंतर गान्धार एवं काकली निषाद । भरत-संगीत के शुद्ध गान्धार-निषाद द्विश्रुतिक (मध्यम-भावी कोमल) होते हैं, तथा अन्तर-काकली चतुः-श्रुतिक होते हैं । शुद्ध गान्धार मध्यम की दो श्रुतियाँ प्राप्त करने पर अन्तर गान्धार बन जाता है, उसी प्रकार षड्ज की दो श्रुतियाँ लेकर शुद्ध निषाद काकली निषाद में परिवर्तित होता है । इस अवस्था में षड्ज एवं मध्यम द्विश्रुतिक हो जाते हैं । अन्तर गान्धार का प्रयोग मध्यमग्राम में तथा काकली निषाद का प्रयोग षड्जग्राम में होता था ।

ii काकल्यन्तर के अतिरिक्त गान्धार-निषाद की अन्य दो विकृतियाँ ('साधा-रण' या 'ग्राम-साधारण') रत्नाकर द्वारा वर्णित हैं, जो त्रिश्रुतिक स्वर होते हैं तथा इन्हें रत्नाकर द्वारा 'कैशिक' संज्ञा दी गयी है । कैशिक गान्धार मध्यम-

---

M: १ वहु २ षा ३ ष्वा ४ श ५ धैवत ६ रा ७ धैवतश्च ८ वद्र ९ ष्वा १० -न्तएत एव ११ र १२ णी १३ ड्जा १४ ल्प

यथा च घटा....भेदेन घटाकाशो विद्यते ।
वस्तुतस्त्वन्य एव....एतदिति नैवावभासते ॥ १४९ ॥
तथा च भरतः,
"साधारणं तद्विविधं द्वैग्रामिक्यं, प्राप्तोपदेश-सिद्धश्च,
निषादः काकली गान्धारश्चान्तरः स्वरः," इति ॥१५०॥
दत्तिलाचार्योऽप्याह :—
"साधारणे तु विज्ञेये स्वर-जात्युपलक्षिते ।
स्वरमध्ये तयोः पूर्वं तत्काकल्यन्तरौ स्वरौ ॥ १५१ ॥
निषादः काकली-संज्ञो द्विश्रुत्युत्कर्षणाद् भवेत् ।
गान्धारस्तद्वदेव स्यादन्तर-स्वर-संज्ञितः" ॥ १५२ ॥
यशोभिः शोभन्ते शरदुदयमो (?) न्मीलदमल– ।
स्फुरन्मध्वी-दाम-द्युतिभिरभितो यस्य ककुभः ॥
त्तचाधारः (?) संग्रामः श्रुतिरपि न सोढा रिपु-नृपैः ।
अमुं श्रुत्यध्यायं व्यंसृजदिह नान्यो नरपतिः ॥१५३॥

इति महासामन्ताधिपति-धर्मावलोक-श्रीमन्नान्यपति-विरचिते सरस्वती-हृदयालङ्कार-नाम्नि भरत-भाष्ये श्रुत्यध्यायस्तृतीयः समाप्तः ॥

ग्राम में प्रयोज्य होता है एवं कैशिक निषाद षड्जग्राम में प्रयोज्य होता है। म० ग्रामिक शुद्ध गान्धार मध्यम की एक (प्रथम) श्रुति लेता है एवं म० ग्रामिक पंचम मध्यम की एक (अन्तिम) श्रुति ग्रहण करता है; इस अवस्था में म० ग्राम में गान्धार, मध्यम तथा पंचम क्रमशः तीन, दो और चार श्रुति के बन जाते हैं। इसी प्रकार ष० ग्राम में निषाद, षड्ज एवं ऋषभ क्रमशः तीन, दो और चार श्रुति से युक्त हो जाते हैं।

iii त्रिश्रुतिक ग-नि का निर्देश तथा वर्णन सर्वप्रथम नान्यदेव ने किया है। नान्यदेव ने कै० ग-नि को अं० का० के साथ मिश्र किया है, इससे अनुमान होता है, कि 'कैशिक' गान्धारनिषाद नान्यदेव के समय में ही नये नये प्रचार में आये होंगे; फलतः उन स्वरों की श्रुतिव्यवस्था को उस समय के ग्रंथकार निश्चित नहीं कर पाये।

F: (१५०) B. २८।३७ pb. (१५१, १५२) D. ४६; १६

M: १ सरदुः २ ञो ३ वि

चतुर्थो मूर्च्छनाऽध्यायः

१ अथ मूर्च्छना-नाम-निरुक्ति-प्रकरणं प्रथमम्

इदानीं ग्रामभेदेन मूर्च्छना[1]ना[2]मवस्थितिः ।
[3]नामाधिदेवतानां[4] च यथावदनुकीर्त्यते[5] ॥ १ ॥
स्वराणां मूर्च्छना मूर्च्छा-धातुर्मोहे समुच्छ्रये ।
स्वरेभ्य [6]उत्थितो नादः स्वरे[7]ष्वेवहि मूर्च्छति ॥ २ ॥
स्वर-मण्डल-संपूर्णा[8] षाडवौडविता[9] तथा ।
साधारणा[10] च विज्ञेया चतुर्धा मूर्च्छना बुधैः ॥ ३ ॥
षड्ज-मध्यम-गान्धार-ग्रामाणां क्रमशस्त्विमाः ।
सप्त सप्तैव मन्तव्या मूर्च्छना एकविंशतिः ॥ ४ ॥
तत्र षड्जग्रामे सप्त मूर्च्छनाः ।
एकविंशतिरा[11]ह भरतः ॥ ५ ॥
"आदा °(वु)त्तरमन्द्रा स्याद्र[12]जनी चोत्तरायता ।
चतुर्थी शुद्धषड्जा च पञ्चमी मत्सरीकृता ॥ ६ ॥
अश्वक्रान्ता तथा षष्ठी सप्तमी चा[13]भिरुद्ग[14]ता ।
षड्जग्रामाश्रिता ह्येता विज्ञेयाः सप्त मूर्च्छनाः ॥ ७ ॥
इत्यमी[15] षड्ज-निषाद-धैवत-पञ्चम-मध्यम-गान्धारर्षभाः
स्वराः क्रमादिति" ॥ ८ ॥

टीः—(१-३१) i. तीनों ग्रामों की मूर्च्छनाओं की नामनिरुक्ति दी है। अश्वक्रान्ता, शुद्धषड्जा, उत्तरायता, पौरवी, मार्गी इत्यादि शब्दों की निरुक्ति शब्द-सादृश्य के आधार पर दी हुई है, अतएव केवल काल्पनिक है।

Ad: (४-७) B. २।३०, ३१;
(८) B. २८-३१ ; pb. 'आसां...गान्धारर्षभाद्याः स्वराः'।

F: (२) M. ९३-९४ (३) B. २८।३३, ii ; M: ९४, i ; R. १।४।१६
(४-७) D. २१-२३ ; M. ९६-९८ R. १।४।१०

M: १ मां २-न्य ३-रा ४ ना ५ र्या ६ नुष्ठितो ७-रो ८ र्णैं ९ ते
१० णे ११ आ १२ द्रं १३ सा १४ त्त १५ नी

एताः [1] सरिगमपधनिषु क्रमेण सनिरुक्त[2]नामाधिदेवता[3]भ्यां दर्शयति, तद्यथा–

षड्जेतूत्तरमन्द्रा स्यान्मन्द्रश्चात्रोत्तरः स्वरः ।
तस्मादुत्तरमन्द्रेयं, यक्षश्चात्राधिदैवतम् ॥ ९ ॥
अभिरौ[4]तीत्यभिरुता तद्[5]गता चाभिरुद्गता ।
मूर्च्छना ऋषभेणेयं, वरुणश्चात्र दैवतम् ॥ १० ॥
अश्व[6]वत्क्रमते यस्माद[7]श्वक्रोश-सम-ध्वनिः ।
अश्वक्रान्तेति गान्धारे ह्यश्विनावत्र दैवतम् ॥ ११ ॥
मध्यमालाप-सरणा सा भवेन्मत्सरीकृता ।
स्वरेण मध्यमेनेयं, स्मृता नागाधिदेवता ॥ १२ ॥
शुद्धश्चात्र भवे[8]त् षड्जः, शुद्धषड्जा ततः स्मृता ।
पञ्चमेन स्वरेणेयं, देवताऽस्याः पितामहः ॥ १३ ॥
उत्तरोत्तरतश्चास्यामायतो हि स्वरो यतः ।
तेनेयं मूर्च्छना प्रोक्ता धैवते चोत्तरायता ॥ १४ ॥
स्वरान्स्वरान्रञ्जयति तेनेयं रजनी मता ।
निषाद-स्वर-संभूता राक्षसश्चात्र दैवतम् ॥ १५ ॥
अथ मध्यमग्रामे । °(यथा) आह भरतः,
"सौवीरी हारिणाश्वा च स्यात्कलोपनता तथा ।
शुद्धमध्या तथा[9] चैव मार्गी स्यात्पौरवी तथा ॥ १६ ॥
[10]हृष्यका चेति विज्ञेया मध्यमग्राम-मूर्छनाः ।"
आसां मध्यम-गान्धारर्षभ-षड्ज-समुद्भवाम् ॥ १७ ॥
.... ।
ब्रह्माधिदेवता चास्या मध्यम-स्वर-मूर्च्छना ॥ १८ ॥

---

ii. श्लो० ३५-३८ में ऋषि आदि की मूर्च्छनाओं के नारदोक्त नाम दिये हैं, जो **ना० शि०** से उद्धृत किये हुए हैं । इनमें षड्जग्रामिक मूर्च्छनाओं के

Ad: (१६-१७) B. २८।३२, ३३

F: (१६-१७) D. २४,२५ ; M. ९९, १०० ; R. १।४।११, १२

M: १ पधनि २ क्ता ३ वा ४ रौद्रि ५ स्यात् ६ थ ७ द्यश्वकोश ८ स्या ९ थौ १० थका

हृष्यन्त्यप्सरसश्चाद्भ्यो गन्धर्वाश्चैव....यतः।
मूर्च्छना पञ्चमे ज्ञेया हृष्यका चार्कदेवता॥ १९॥
अम्भोधर-रवाकारान्पूर्णा तु -²- कुरुते स्वरान्।
पौरवी धैवते मूर्च्छा विधिश्चात्राधिदैवतम्॥ २०॥
मृगैः संचर्यते यस्मान्मृग्यते च स्वरैरियम्।
मार्गी निषादे विज्ञेया मृगेन्द्रश्चाधिदैवतम्॥ २१॥
मध्यदेशे समुत्पन्ना षड्जे स्याच्छुद्धमध्यमा।
मध्यमोऽत्र स्वरः सिद्धो गन्धर्वश्चात्र दैवतम्॥ २२॥
काल-रूप-नता या तु मरुद्भिर्ऋषभे स्वरे।
स्यात्कलोपनता मूर्च्छा मरुच्चात्राधिदैवतम्॥ २३॥
हरिदेव-समुत्पन्ना गान्धार-स्वरसम्भवा।
मूर्च्छना हारिणाश्वा स्यादिन्द्रश्चात्राधिदैवतम्॥ २४॥
गान्धारग्रामश्च भरतेनालौकिकत्वान्नोपदर्शितः।
अस्माभिश्चागमानुसारेण प्रदर्शितः॥ २५॥
अतस्तदीयाः सप्त मूर्च्छना ग-म-प-ध-नि-स-रिषु स्वरेषु क्रमेण सनिरुक्तनामाधिदेवताभ्यामुपदर्श्यन्ते॥ २६॥ तद्यथा—
आलापस्यातिरौद्रत्वाद्गान्धार-स्वर-मूर्च्छना।
आलापा मूर्च्छना ज्ञेया रुद्रश्चात्राधिदैवतम्॥ २७॥
ग्रामेषु त्रिषु सर्वत्र मध्यमो नैव लुप्यते।
मध्यमस्य विशालत्वाद् विद्याद् वै विष्णु-देवता॥ २८॥

नामों के साथ भरतादि द्वारा कथित दोनों ग्रामों की मूर्च्छनाओं के कतिपय नाम संमिश्र हैं।

iii. अनुमान किया जाता है, कि भरत-समय के पूर्व नारदोक्त मूर्च्छना-नाम ही व्यवहृत होते थे।

F: (९-२४) R. १।४। २०, २१

M: १ सायं २ युक्तं ३ श्च ४ व ५ न

15

गये (?) षड्जश्चलव्यूढा पितामहमुपस्थिता ।
षड्जेयं मूर्च्छना तेन पञ्चमेऽनल-देवता ॥ २९ ॥
गान्धार्यास्तूत्तरं यस्मात्....ष्टेयं मूर्च्छना ततः ।
धैवतोत्तर-गान्धारः सवश्चात्राधिदैवतम् ॥ ३० ॥
गान्धारयति-शब्देन गान्धारस्येति वा पुनः ।
निषादे [1] शुद्धगान्धारी गावश्चात्राधिदैवतम् ॥ ३१ ॥
....तेषां नन्दिनी षड्ज-संश्रिता ।
ऋषीणां स्नातकानां च विश्वेदेवाश्च दैवतम् ॥ ३२ ॥
सक्तु-तानारतं (?) श्रुत्वा यस्माद्गायन्ति किंनराः ।
ऋषभे तिमा(?) तस्मात्पक्षिराजोऽत्र दैवतम् ॥ ३३ ॥
नारदेनापि मुनिना प्रोक्ता नामान्तरे तु याः ।
मूर्च्छना ग्रामभेदेन तासां नामाभिधीयते ॥ ३४ ॥
तत्र षड्जग्रामे—
षड्जे तूत्तरमन्द्रा स्यादृषभे चाभिरुद्गता ।
अश्वक्रान्ता तु गान्धारे तृतीया मूर्च्छना स्मृता ॥ ३५ ॥
मध्यमे खलु सौवीरी हृष्यका पञ्चमे स्वरे ।
धैवते चापि विज्ञेया मूर्च्छना तूत्तरायता ॥ ३६ ॥
निषादे रजनी विद्याद् ऋषीणां सप्त मूर्च्छनाः ।
अथ मध्यमग्रामे—
आप्यायनी विश्वदूता चन्द्रा हेमा कपर्दिनी ।
मैत्री चान्द्रमसी चैव पितॄणां सप्त मूर्च्छनाः ॥ ३७ ॥
अथ गान्धारग्रामे—
नन्दा विशाला सुमुखी चित्रा चित्रवती सुखा ।
आलापा चैव विज्ञेया देवानां सप्त मूर्च्छनाः ॥ ३८ ॥

स्प०—MS. में इसके आगे उपरोक्त ३६ और ३७ पुनरुक्त हैं ।

F: (३५,३७) R. १।४।२३,२४ pb. 'उत्तरवर्णा', 'विश्वकृता' (३८) R. १। ४। २२–२६

M: १ श्व २ ले ३ पि

षड्ज-मध्यम-गान्धार[1]ग्रामाणामप्यनुक्रमात्।
मूर्च्छनाः पूर्वकथिता[2] ज्ञेया नामान्तरादिमाः ॥ ३९ ॥

यत्र ग्रामे यदा यस्तु षाडवे लुप्यते स्वरः।
तदा तन्मूर्च्छना-हीनं विज्ञेयं षाडवं बुधैः ॥ ४० ॥

ज्ञेयं मौडवितेऽप्येवं पञ्च-स्वर-कृते सदा।
लोप्ययोः स्वरयोरेव मूर्च्छा-द्वय-विलोपनम् ॥ ४१ ॥

२ अथ मूर्च्छनाऽतियोग-कथनं प्रकरणं द्वितीयम्

साम्प्रतं मूर्च्छनानां च ह्यतियोगो निगद्यते ॥ ४२ ॥

एताश्चैव प्रतिग्रामं सप्त, ता एकविंशतिः ॥ ४३ ॥

उत्तरमन्द्रा रजनी ह्यश्वक्रान्ता तथैव च।
स्यान्म[3]त्सरीकृता शुद्धषड्[4]जा चैवोत्तरायता ॥ ४४ ॥
तथाऽभिरुद्गता, सप्त ष[5]ड्जग्रामस्य मूर्च्छनाः ॥ ४५ ॥

तत्र येनैव स्वरेण तूच्छ्रायो गीतानामुद्ग्राहः प्रवर्तते, तेनैव स्वरेण यदाऽपोहः समाप्तिरपि भवति, तदा 'सरिगमपधनिस' इति स्वर-सन्निवेशे सति ॥ ४६ ॥

टी:— (४६-४७) i. मूर्च्छना के नियम समझाये हैं, कि उद्ग्राह तथा समाप्ति एक ही स्वर द्वारा करनी चाहिए। अर्थात् मूर्च्छना का प्रारंभिक स्वर ही मूर्च्छनान्तःपाती होना चाहिए, जिससे प्रत्येक मूर्च्छना 'स–सं', 'नि़–नि', 'ध़–ध' आदि प्रकार से बनेगी। अर्थात् यह मूर्च्छना आठ स्वरों की बनेगी।

स्प०– (४२) i. MS. के पत्र ६४–६५ पर मूर्च्छनाविषय के श्लोक आये हैं, जो यहां क्र० ४२ से ६३ तक दिये है।

ii. श्लो० ४२ के आगे 'स्वराणां मूर्च्छना मूर्च्छा-धातुः' इत्यादि उपरोक्त श्लो० क्र० २ MS. में पुनरुक्त है।

F. (४३-४९) B. २८। ३०-३५ ; D. २१-२५ ; M. ९४-१०१; R. ११४। ९-१५

M १-रा २ कार्थिता ३ प्रशरीकृता ४-मध्या ५ नव-

एवं निषाद-स्वरेणैवोद्ग्राह-समाप्तौ कृतायां 'निसरिगमपध-नी'ति सन्निवेशे । तथा—'धनिसरिगमपध' इति; 'पधनिस-रिगमप[1]' इति; 'मपधनिसरिगम' इति; 'गमपधनिसरिग' इति; 'रिगमपधनिसरि' इति सन्निवेशे क्रमादेताः षड्जग्रामिकाः सप्त मूर्च्छना जायन्ते ॥ ४७ ॥

सौवीरा हारिणाश्वा स्यात्कलोपनता तथा ।
शुद्धमध्या च मार्गी च पौरवी हृष्यका तथा ॥ ४८ ॥
सप्तभिर्मुनिभिः प्रोक्ता मध्यमग्राममूर्च्छनाः ॥ ४९ ॥

यत्राप्युद्ग्राह-समाप्तौ मध्यम-स्वर-योगान्मपधनिसरिगमेति

---

ii. **मतंग** एवं **रत्नाकर** ने मूर्च्छना की जो व्याख्या दी है, उसके अनुसार 'क्रमयुक्त सप्त (या द्वादश) स्वरों का आरोहावरोह करने' से मूर्च्छना पैदा होती है । इस प्रकार के आरोहावरोह को रत्नाकर ने मूर्च्छना संज्ञा दी है:—

"क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् ।
मूर्च्छनेत्युच्यते.................. ॥ १।४।९ ॥"

किन्तु **कल्लिनाथ** ने स्पष्ट किया है, कि इस प्रकार के सप्तस्वरों के समुदाय को मूर्च्छना नाम दिया जाता है, न कि आरोहावरोहक्रिया को । कल्लिनाथ का यह स्पष्टीकरण मतंग के वचन पर आधारित होना चाहिये, जो इस प्रकार है:—'स्वराणामेव मूर्च्छनात्वं, न त्वारोहणावरोहणरूपायाः क्रियायाः' । इसके पश्चात् कल्लिनाथ ने मतंगकृत व्याख्या दी है ।

मतंग द्वारा की हुई मूर्च्छना की व्याख्या निम्ननिर्दिष्ट है:—

'आरोहणावरोहण-क्रमेण स्वर-सप्तकम् ।
मूर्च्छना-शब्द-वाच्यं हि विज्ञेयं तद्विचक्षणैः ॥ ९५ ॥'

iii. नान्यदेव ने मूर्च्छना के उदाहरण दिये हैं, वे क्रमयुक्त आठ स्वरों के आरोह के रूप दिये हैं, जैसा कि :– 'सरिगमपधनिसं' इत्यादि । मतंग की दी हुई मूर्च्छनाएँ भी सप्त स्वरों के केवल आरोहरूप ही हैं । इस विषय में मतंग का वचन निम्नलिखित है:—

'एवं तावदुभयग्रामिक्यश्चतुर्दश मूर्च्छनाः सम्पूर्णाः,— 'सरिगमपधनि' । 'निसरिगमपध' इत्यादि (पृ० २३) ।

M: १ धिति

स्वर-सन्निवेशे सत्येवं रागादि (?)....।
ऋषभात् ....। गान्धारत्वादिभेदेन क्रमादेताः
सप्त मूर्च्छना जायन्ते ॥ ५० ॥

तथाऽऽलापा विशाला च षड्जाऽन्या तदनन्तरम्।
तथैवोत्तरगान्धारी शुद्धगान्धारिका तथा ॥ ५१ ॥
नन्दिनी कु.............ना।
..................वति गान्धारग्राममूर्च्छनाः ॥ ५२ ॥

अत्राप्युद्ग्राह-समाप्तिभ्यां गान्धार-स्वर-साधारणतया 'गमपधनिसरिगे'ति स्वर-सन्निवेशे सत्येवमृषभादि षड्ज (?) ऋषभान्तत्वादि-भेदेन क्रमेणैताः सप्त मूर्च्छना जायन्ते ॥ ५३ ॥ न त्वभिन्न एवेशे (?) स्तद्गतौ मूर्च्छनाः सप्तभ्यः पृथगुपदिश्यन्ते। नव-संज्ञान्तरकरण एव नियमाद्दष्ट-शक्तिरित्युच्यते ॥ ५४ ॥ नीचोच्चत्वादि-जनितो भेदो ग्रामेषु च स्फुटः। स्वरानुपूर्वी साम्येऽपि तत्तन्मूर्च्छनान्यत्वम् त्रैगामिकीणामेतासां मूर्च्छनानां च जायते ॥ ५५ ॥
अनाशी मध्यम-°[स्त्रिषु] ग्राम-सप्तकेष्ववस्थितः ॥ ५६ ॥
यथाऽऽह भरतः

'सर्व स्वराणां मुखरो ह्यनाशित्वादयं स्मृतः।
गान्धर्व-कल्पे विहितः सामगैरपि मध्यमः' ॥ ५७ ॥

दत्तिलोऽप्याह—

"पञ्चमं मध्यमग्रामे षड्जग्रामे च धैवतम्।
अनाशिनं विजानीयात् सर्वदैव तु मध्यमम्" ॥ ५८ ॥

एतेन स्वरालापपक्षे प्रवाह-प्रतिहत एव तत्तत्स्वर-मूर्च्छनाऽन्यव्यपदेशः ॥ ५९ ॥

F. (५७) B. २८।७३ pb.; R. ११४।६ (५८) D. २०

M: १ लो २ वद्वारन्या ३ र्गा ४ त्मे- ५ तत्ता ६ न्वेन ७ -न्ते ८ -स्यो

चतुर्धा मूर्च्छनाश्चैताः सम्पूर्णाः षट्स्वरास्तथा।
...............षड्ज (?) साधारणात्मिकाः ॥ ६० ॥
तथा लुप्तस्वराः प्रोक्ता एक-द्वि-स्वर-लोपतः।
षाडवा औडवाः साधारणात्साधारणाभिधाः[1] ॥ ६१ ॥

टी०:—(६०-६१) i. मूर्च्छना के चार प्रकार प्रत्येक ग्राम में बताये हैं, वे ष० ग्राम एवं म० ग्राम में ही समझना चाहिए; कारण, गान्धारग्राम में ग्रामांश स्वर षट्श्रुतिक गान्धार होने से उसमें अन्तर-काकलि-युक्त मूर्च्छना ठीक तरह से बन नहीं सकेगी ।

ii. **मूर्च्छना के चार प्रकार** १ः सम्पूर्णा; २ः षाडवा; ३ः औडवा; तथा ४ः काकलयन्तरयुक्ता इस प्रकार नान्यदेव ने कहे हैं। भरत, दत्तिल एवं मतंग ने यही चार प्रकार कहे हैं:—

(A) 'एवमेताः प्रक्रम-युक्ताः पूर्णाः षाडवौडविती-
कृताः साधारण-कृताश्चेति चतुर्विधाश्चतुर्दश मूर्च्छनाः ।
क्रमयुक्ताः स्वराः सप्त मूर्च्छनास्त्वभिसंज्ञिताः ।
षट्-पञ्चक-स्वरास्तासां षाडवौडविताः स्मृताः ॥३४॥
साधारण-कृताश्चैव काकली-समलङ्कृताः ।
अन्तर-स्वर-संयुक्ता मूर्च्छना ग्रामयोर्द्वयोः ॥२८।३५॥'

— **भ० ना०**

(B) 'सर्वास्ता पञ्च-षट्-पूर्ण-साधारण-कृताः स्मृताः ।'

— **द० २५**

(C) 'तत्र सप्तस्वर-मूर्च्छना चतुर्विधा— पूर्णा, षाडवा, औडविता, साधारणा चेति। तत्र सप्तभिः स्वैर्या गीयते सा पूर्णा । षड्भिः स्वैर्या गीयते सा षाडवा । पञ्चभिः स्वैर्या गीयते सा औडविता । काकल्यैरन्तर-स्वैर्या गीयते सा साधारणा' —**बृ० दे०** (पृ० २२)

iii. मूर्च्छना-प्रकारों के विषय में **रत्नाकर** ने मतभिन्नता प्रकट की है। उसने शुद्धा, अन्तर-सहिता, काकली-सहिता एवं अन्तर-काकली-युक्ता इस प्रकार चतुर्विधा मूर्च्छना बतायी है, और षाडव-औडव मूर्च्छनाप्रकार तानों में अन्तर्भूत किये हैं (**सं० र० १।४।९**)। रत्नाकर द्वारा किया गया यह वर्गीकरण सुव्यस्थित अवश्य है, किन्तु भरतादि से भिन्न है ।

M: १ यथा

स-रि-ग-प-ध-नि-हीनाः षाडवा (मूर्च्छनाः) स्युः।
षाडव-स्वर-जनित एको मध्यमो नैव लोप्यः॥
स्वर-युगुल-विहीना औडवास्तु स्वरज्ञै–।
रिहहि मुनिभिरुक्ताः पञ्चधा मूर्च्छनास्तु॥ ६२॥
स-प-हीनं रि-प-हीनं, ग-नि-हीनं,........।
रि-ध-हीनं, ग-नि-हीनं,........ ॥ ६३॥

---

iv. रत्नाकरोक्त वर्गीकरण के आधार पर आजकल कुछ ऐसे ही निष्कर्ष निकाले जा रहे हैं, कि (१) 'एवमेताः प्रक्रम-युक्ताः' इत्यादि भरत-वचन प्रक्षिप्त है; तथा (२) 'क्रमयुक्ताः स्वराः सप्त मूर्च्छनास्त्वभिसंज्ञिताः।' इत्यादि (३४ एवं ३५) श्लोकों का अर्थ येनकेन प्रकारेण करते हैं, किः—

'क्रमयुक्त सात स्वर मूर्च्छना कहलाते हैं। उन मूर्च्छनाओं के षट्स्वर षाडव और पंचस्वर औडवित की उत्पत्ति होती है। साधारणकृत, काकलीयुक्त एवं अन्तर-संयुक्त मूर्च्छनाएँ भी दोनों ग्रामों में होती हैं। यहां षाडवित औडवित यह मूर्च्छनाओं से उत्पन्न होनेवाले रूप हैं, जिनका नाम 'तान' है, ये मूर्च्छनाओं के भेद नहीं।'

इन तर्कों का निराकरण इस प्रकार हैः–

(अ) 'क्रमयुक्ताः स्वराः सप्त०' इत्यादि श्लोकों से मूर्च्छनाप्रकारों का वर्णन किया गया है तथा ये श्लोक 'एवमेताः प्रक्रम-युक्ताः पूर्णा०' इत्यादि वाक्य के पश्चात् स्पष्टीकरणार्थ आये हैं, अतः मानना पडता है, कि 'क्रमयुक्ताः स्वराः सप्त०' इत्यादि वाक्य प्रक्षिप्त नहीं है।

स्प०— i. श्लो० ६३ के पश्चात् MS. में 'साधारणं तद् द्विविधं; जाति-कृतं, स्वर-कृतं....' इत्यादि 'साधारण' का विषय वर्णित है, तत्पश्चात् 'वादी' 'संवादी' आदि स्वरों की चर्चा आयी है। 'साधारण' का विषय तृतीयाध्याय में उद्धृत किया है।

ii. निम्नोद्धृत श्लोक MS. के प० १३ ऊपर आये हैं।

.... सरि-हीनमथापरम्।
सध-हीनं, सरि-हीनं, रिग-हीनं परि-च्युतम्॥
रिध-हीनं, गिरि-हीनं गय-हीनं पध-च्युतम्।
गति-हीनं, पध.हीनं......धनि-च्युतम्॥

M: १ पूर्वादासेव

तानानामधुना सम्यग् व्युत्पत्तिः सिद्धिरेव च ।
षाडवौडव-पूर्णानां संयोगश्चैव कथ्यते ॥ ६४ ॥
षड्जर्षभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादाः ।
परस्परेण तन्यन्त इति तान-संज्ञां लभन्ते ॥ ६५ ॥

(इ) 'क्रमयुक्ताः स्वराः सप्त' इत्यादि दो श्लोकों से भरतमुनि ने मूर्च्छनाओं के चार प्रकारों का ही वर्णन किया है, कारण इन श्लोकों की अन्तिम पंक्ति में 'मूर्च्छना' शब्द स्पष्ट है:—

'अन्तर-स्वर-संयुक्ता मूर्च्छना ग्रामयोर्द्वयोः ॥ ३२ ॥'

(उ) उपर्युक्त निष्कर्ष (२) में भरतवचन का निकाला हुआ अर्थ— 'साधारणकृत, काकलीयुक्त एवं अन्तर-संयुक्त मूर्च्छनाएँ भी दोनों ग्रामों में होती हैं' भ्रामक है। कारण, उपरोद्धृत (A) में 'एवमेताः प्रक्रम-युक्ताः पूर्णाः' इत्यादि भरतवचन दिया है, उसमें चतुर्थ भेद 'साधारणकृता' इस प्रकार संक्षिप्तरूप से कहा गया है, उसी का स्पष्टीकरण बाद में श्लोक ३४, ३५ में भरतमुनि ने 'साधारण-कृताश्चैव काकली-समलङ्कृताः। अन्तर-स्वर-संयुक्ता मूर्च्छना..........।' इन शब्दों से किया है। तात्पर्य, इन श्लोकों द्वारा भरतमुनि ने १: 'साधारणकृत', २: अन्तरयुक्त एवं ३: काकली-युक्त ऐसे तीन मूर्च्छनाप्रकार नहीं बताये हैं; अपितु, 'साधारण-कृत' के दो भेद—१ : अन्तर-युक्त तथा २: काकली-युक्त स्पष्ट किये हैं। 'साधारणकृत' के उक्त दो भेद बताने का कारण यह है, कि 'साधारणकृत' मूर्च्छना दोनों ग्रामों को व्याप्त करनेवाली है, परन्तु षड्ज-ग्रामिक 'साधारण-कृत' मूर्च्छना काकलीयुक्त होगी, तो मध्यम-ग्रामिक 'साधारणकृत' मूर्च्छना अन्तर-युक्त होगी। 'साधारण-कृताश्चैव०' इत्यादि श्लोक से भरतमुनि ने 'साधारण-युक्त' मूर्च्छनाओं का ग्राम-विशिष्ट वियोजन करके बताया है; कारण कि भरतसंगीत में काकली निषाद केवल षड्जग्राम में प्रयोज्य होता था, उसी प्रकार अन्तर-गान्धार एकमात्र मध्यमग्राम में प्रयोज्य स्वर था। अतः आजकल के इन निष्कर्षों के अनुसार 'साधारण-कृत, अर्थात् काकली-युक्त एवं अन्तर-संयुक्त मूर्च्छनाएँ भी दोनों ग्रामों में होती हैं' ऐसा तर्क किया गया है, वह भरत-मन्तव्य के विपरीत है, अतएव भ्रामक है।

V. भरतादिओं के लिखने से स्पष्ट होता है, कि **षाडव-ओडव मूर्च्छनाओं** का ही दूसरा नाम 'तान' था। निम्नोद्धृत ग्रंथवचन इसके प्रमाण हैं:—

F: (६५-७०) D. ३८-४१; M. पृ. ३०-३१; R. १।४।२७-५९

M: १ म—

तनु विस्तार इत्यस्माद् धातोः कर्मणि तत्र तान-सिद्धिः ॥ ६६ ॥
ते च स्वराः षाडवौडव-पूर्णाः प्रस्तार-क्रमेण कायामेव (?) चत्वारिंशदधिक-पञ्च-सहस्राणि भवन्ति ॥ ६७ ॥ एकादि-क्रमेण सप्तान्तान् विनिवेश्य पूर्वं परेण गुणयेत्। यथा एक-स्वरस्याधिकृतत्वादेकैव संख्या ॥ ६८ ॥

---

(१) 'तत्र मूर्च्छना-संश्रितास्तानाश्चतुरशीतिः।'

(२) 'प्रयोक्तुः श्रोतुः सुखार्थं तान-मूर्च्छना-तत्त्वम्।
मूर्च्छना-प्रयोजनमपि स्थान-प्राप्त्यर्थः।'
— **भ० ना०** २८।३६

[३] 'पञ्च-स्वराः षट्-स्वराश्च मूर्च्छना याः प्रकीर्तिताः।
तानाश्चतुरशीतिस्तु ता एवाप्तैरुदाहृताः॥'
—**द० ३०**

(४) 'इदानीं सम्प्रवक्ष्यामि षाडवौडव-मूर्च्छनाः।' इत्यादि
—**बृ० दे०** पृ० २४

(५) 'तानाः स्युर्मूर्च्छनाः शुद्धाः षाडवौडुवितीकृताः॥'
—**सं० र०** १।४।२७॥

(६) 'प्रसङ्गात्क्रमानुक्त्वा मूर्च्छनैक-देश-रूपत्वेन
मूर्च्छनाऽनन्तरमुद्दिष्टाञ्शुद्ध-तानाँल्लक्षयति।' (—**क०**)

मूर्च्छना और तान में वस्तुतः कोई अन्तर नहीं, इस प्रकार का नारद-भरत-पूर्व ग्रन्थकार **विशाखिल** का मत मतंग ने उद्धृत किया है:—

'ननु मूर्च्छना-तानयोः को भेदः? उच्यते मूर्च्छना-तानयोर्नार्थान्तरत्वमिति विशाखिलः।'

(७) आगे चलकर मतंग ने विशाखिल के मत का खण्डन किया है, कि मूर्च्छना आरोह-क्रम-युक्त होती है, तो तान अवरोह-क्रम से होती है, यही दोनों का भेद है। 'एतच्चासङ्गतम्। संग्रहश्लोके तु मूर्च्छना-तानयोर्भेदस्य प्रतिपादितत्वात्। तत् कथम्? मूर्च्छनाऽऽरोह-क्रमेण तानोऽवरोह-क्रमेण भवतीति भेदः।' (पृ० २६)। इस विषय में पहले ही स्पष्ट किया है, कि मतंग तथा नान्यदेव द्वारा दिये गये मूर्च्छनाओं के उदाहरण केवल आरोह-युक्त ही हैं।

मूर्च्छना तथा तानें प्रथमतः सामगायन में प्रयुक्त होती थीं और सामसप्तक अवरोही था। यही कारण होगा, कि मूर्च्छना-तानें निम्न-निम्नस्थ स्वरों से आरम्भ होती थीं।

द्वयोः संयोगाद्वावेव। त्रयाणां षड् भेदाः । चतुर्णां चतुर्विंशतिः। पञ्चानां विंशत्यधिकं शतम् ॥ ६९ ॥ षण्णां विंशत्यधिक-सप्त-शतानि । सप्तानां चत्वारिंशद्-धिक-पञ्च-सहस्राणि । अत्र स्वर-संख्यया समुच्चार्य[1] त्रयस्त्रिंशदधिक-पञ्च-सहस्राणि[2] ताना इति ॥ ७० ॥

ब्रूमोऽधुना तान-संख्या ग्रामेषु त्रिष्वनुक्रमात् ।
प्रस्तारं योगं च तथा नाम तानस्य यस्य तत् ॥ ७१ ॥
षड्जमृषभ-गान्धार-मध्य-पञ्चम-धैवतान् ।
निषादं च क्रमादेवं षड्जग्रामे न्यसेत्स्वरान् ॥ ७२ ॥
स्वरा मपधनीत्येवं सरिगैः सह विन्यसेत् ।
मध्यमग्राममासाद्य कथितोऽयं स्वर-क्रमः ॥ ७३ ॥
ग-म-प-ध-नि-स-रीति ग्रामो गान्धार उच्यते ।
अत्राप्यनुक्रमेणैवं स्वरान्सप्त निवेशयेत् ॥ ७४ ॥
त्रयस्त्रिंशत्परा पञ्च-साहस्री पूर्ण-संख्यया ।
विज्ञेया ग्राम एकस्मिन् तानानां तान-वेदिभिः ॥ ७५ ॥
सविंशतिः सप्तशती प्रत्येकमपि षाडवे ।
प्रत्येकमौडवे विंशत्यधिकं शतमिष्यते ॥ ७६ ॥
केचिदेवावकृष्टासु ध्रुवासु[3] चोपयोगतः ।
चतुःस्वर-प्रयोगस्तु मुनिना चोपदर्शितः ॥ ७७ ॥
क्रियां....स्तस्य हेतुत्वाद् विंशतिश्च तथा पुनः ।
अधिका सप्तनवत्या ज्ञेया तान-प्रयोक्तृभिः ॥ ७८ ॥
एवं ग्रामे मध्यमाख्ये[4] त्रिभिरेव च षाडवैः ।
ओडव-द्वितयेनापि तथा चतुःस्वरेण च ॥ ७९ ॥
पूर्णेन च भवेत्सप्तसाहस्री तान-भेदतः ।
चतुःशती तथा सप्तपञ्चाशद[5]धिका पुनः ॥ ८० ॥

M: १ वः २ त्रयोविंशद्- ३-स्ते ४-स्ये ५-दश-

गान्धारेऽपि तथा ग्रामे एकादशभिरौडवैः ।
षाडवेनापि चैकेन तथा चतुःस्वरेण च ॥ ८१ ॥
पूर्णेन च भवेत्तानं संख्यया सह कथ्यते ॥ ८२ ॥
तानानां सप्तनवति सहस्राण्यथ सप्त च ।
गान्धारग्राममासाद्य संख्येयं समुदाहृता ॥ ८३ ॥
ग्राम-त्रयेऽपि चैवं स्यात्संख्याऽत्र समुदाय[1]तः ॥ ८४ ॥
एकपञ्चाशदधिका भवेदष्टशती तथा ।
द्वाविंशतिः सहस्राणि [2]तानाः स्युः पुनरुक्तितः ॥ ८५ ॥

अत्र च पुनरुक्त-निरन्तरैकान्तर-विवादिता ।........
....म-परित्यागात् ॥ ८६ ॥ नारदेन स्तोत्र-यज्ञोपयोगितया ग्राम-त्रय एकोनपञ्चाशदेव षाडवौडवयोः कथितास्तानाः ॥ ८७ ॥ यदाह—

"विंशतिर्मध्यमग्रामे षड्जग्रामे चतुर्दश ।
तानाः पञ्चदश प्रोक्ता गान्धारग्राममाश्रिताः ॥"

इति । भरताचार्यस्तु स्वशास्त्रे प्रयोगाङ्गता-गीतोपयोगिनः षड्ज-मध्यम-ग्रामयोरनुलोम-षाडवौडवाभ्यां चतुरशीतिमथ तानानुक्तवान् ॥ ८८ ॥ अस्माभिश्च कश्यप-मतंग-तुम्बरु-विशाखिलाद्याचार्य-निखिल-मुनि-वचनाद् ग्राम-त्रयेऽप्यनुलोम-विपर्ययात् ॥ ८९ ॥

स्प०—(८७-८९) वाक्य ८७-८९ MS. प० १५ ऊपर पुनरुक्त हैं, उनका पाठ शुद्ध होने से वे यहाँ उद्धृत किये हैं। वाक्य ८६ के पश्चात् क्रमशः आये हुए वचन [प० १४ ऊपर] निम्नानुसार हैं :—

नारदेन यज्ञज्ञस्तं स्तवपानयकतया क्रम्रा मत एकोनपञ्चाशदेव तानाः प्रदार्शिताः ॥ ८७ ॥....प्रयोगाङ्गतया पुनरुक्ते पञ्चविंशतिभिः सह ग्रामद्वये... रेवोक्ताः ॥ ८८ ॥ अस्माभिस्तु विशाखिलाद्याचार्य-प्रोक्तैकं ग्रामिक पञ्चसहस्र तानस्य रागोत्पत्ति-हेतुतयाऽवश्यंभवं ग्रामत्रयेऽप्युपदर्शितस्तानभेदः ॥ ८९ ॥

M: १–यतः २ तेना

न तु [1]ग्राम-[2]त्रये सम्पूर्ण-पञ्च-[3]सहस्र-ताना वृद्ध्या वृद्ध्या नवनवत्यधिक-पञ्च-सहस्र-तानेषु षड्जग्रामतानानामेव पुनरुक्तत्वम् ॥ ९० ॥ मध्यम-गान्धार-ग्राम-तानानां [4]ततः कियतामेव पुनरुक्तत्वम् ? पुनरुक्तास्तु बहवस्तत्र तेषामुपादानमिति प्रयोजनम् ॥ ९१ ॥

अत्रोच्यते– ग्राम[5]-भेद एव[6] श्रुति-भेद-निबन्धनः । यदाहुः–"यदाऽन्योन्य-विपर्यस्त-श्रुती पञ्चमधैवतौ । तदा तं मध्यमग्रामं प्रवदन्ति मनीषिणः ।" इति ॥ ९२ ॥

अतः श्रुतेः प्राधान्यात् तन्निबन्धनो भेदः । सर्वत्र संप्रयुक्त एक[7]-रूपतः पुनरुक्तत्वेऽपि ग्राम-भेदा....न श्रुत्यनुसारेण तान-भेदस्य स्पष्टतरत्वादेतस्मिन् रागोत्पत्ति-हेतुत्वमेव न स्यात् ॥ ९३ ॥

ननु [8]माभूदेवं पुनरुक्तानां रागोत्पादकत्वम् । ननु षाडवौडव-चतुःस्वराणां पञ्चसहस्राणीति वचनात् ॥ ९४ ॥

अतोऽनर्थकं षाडवौडव-चतुःस्वर-संख्या-कथनम् । अत्रोच्यते– पञ्चसहस्राणीति । ....पूर्ण-स्वराभिप्रायेण पुनरन्यस्य व्यवच्छेदात् । चतुःस्वर-योग-प्रयोगस्यापि दर्शितत्वात् ॥ यदाह भरतः – "षट्-स्वरस्य प्रयोगोऽस्ती"ति । 'जातिभ्यो राग-सम्भव' इति मुनि-वचनाज्जातीनां दश-लक्षणत्वेन षाडवौडव-कृतत्वादत्रापि सुव्यक्तम् ॥ ९५ ॥ षाडवौडवयो रागोत्पादकत्वं अतो...सादिभिर्लक्षणैः, बिन्दु-कुहरादिभिरलङ्कारैस्तिरिपादि[10]भिर्गमकै[11]ः । दीप्तादिभिरनुरञ्जिकाभिर्मूर्च्छनाभिश्च व्यक्तिभिः ॥९६॥ [12]सम्पूर्णस्वर-ताना ग्राम-राग-मूल-रागाः,

---

M: १ या- २-वं ३-म ४ ततं ५-मं ६-वं ७-व ८ विव ९ ना १०-दिति ११-के १२ सां

षट्स्वर-ताना भाषा-विभाषाः। पञ्चस्वर-ताना अन्तरभाषा[1]-श्चतुःस्वर-तानाः क्रियाङ्ग-रागानुत्पादयन्ति, इति स्थितम्॥९७॥

यद्यपि च प्रतिग्रामं षाडवं सम-वर्जितं (?)....षाडवाः। पञ्चदशैवौडवाः। प्राप्तास्तथा ह्याप्तोपदेश[2]-सिद्ध-त्वादिति॥ ९८॥

मुनि-वचनाद् यथोक्त-षाडवौडव-व्याप्तिभी रोचति तदभियुक्तैरूहनीयम्॥ ९९॥

अथ प्रस्तारः—

सरिगमपधनीति षड्जग्रामे विनिवेशयेत् स्वरानु-क्रमशः। जानीयात्त्वैतेषां[3] क्रमादितोऽष्टतां (?) कनिष्ठ-त्वम्॥ १००॥

एवं व्यष्टाविक्रम-(?)–मादायारोपयेत् स तान् यथासंख्यम्। अपि मध्यम-गान्धार-ग्राम-द्वितये च सर्वदा विद्वान्॥ १०१॥

आदि-स्वरस्य संख्या विंशत्यधिकेह भवति सप्तशती।
कथिता स्वर-संख्या विंशत्यधिक-शतं द्वितीयस्य॥ १०२॥

ख्यातश्चात्र चतुर्विंशति-संख्याकः स्वरस्तृतीयोऽपि।
षट्-संख्या-गुणित....स्वरश्चतुर्थे स्थितस्तथा स्थाने॥ १०३॥

स्थाने च पञ्चमे यः स्थितः स्वरोऽसौ....।
अथ षष्ठ-सप्तमौ च स्वरौ यथा-क्रम-विपर्ययौ ज्ञेयौ॥
एवं प्रस्तार-विधौ स्वर-विनिवेशं विजानीयात्॥ १०४॥

४ अथ नारदोक्त-तानवर्णन-प्रकरणं चतुर्थम्

अथ तानानाम्—

M: १ अनन्तर २–न्या– ३–त्वै–

....तेषु यज्ञेषु तानेन स्तोत्रं प्रवर्तते ।
तथा तानस्य प्रशम-कर्म-नामा च ये क्वचित् ॥ १०५ ॥
स्तोत्र-कर्तृ-प्रिय-नामा केषां .... ।
सादृश्यात्कस्यचिन्नाम, निरुक्तं तेन नोदितम् ॥ १०६ ॥

षाडवौडव-चतुःस्वराणां तानानां यथासंभवं भेदोऽभिहित एव सम्प्रति ग्राम-त्रयेऽपि नारदोक्तैकोनपञ्चाशतां नामानि प्रदर्शयिष्यामः ॥ १०७ ॥

नामानि च षड्ज-मध्यम-ग्रामयोरनुलोमे षाडवौडवाभ्यां भरताभिहित-चतुरशीति-तानेभ्यो निरन्तरैकान्तर-विवाद-पुनरुक्त-त्यागात् चतुर्विंशतिः ॥ १०८ ॥

गान्धार-ग्रामेऽप्यनुलोम-षाडवौडवाभ्यां पञ्चत्रिंशत्तानेभ्यः पञ्चदशानामेव; तद्यथा—

प्रस्तारकोऽथ पैशाचो जीवः सा[1]वित्र एव च ।
अर्धसावित्र-ना[2]मा च सर्वतोभद्र ए[3]व च ॥ १०९ ॥
स्वर्णो विष्णुश्च जिष्णुश्च तथा विष्णुकरः स्मृतः ।
शारदश्चाथ वि[4]जयो हंसो ज्ये[5]ष्ठस्तथैव च ॥
षड्जग्रामे भवन्त्येवमेते तानाश्चतुर्दश ॥ ११० ॥
एकपाद[6]श्च वायुश्च दा[7]नोऽग्निष्टो[8]मिकस्तथा ।
वाजपेयिक-नामा च पौण्डरीकाश्वमेधिकौ ॥ १११ ॥
राजसूयक-नामा च बहुसौवर्णिकस्तथा ।
तथा चौपाधिकः प्रोक्तो महाव्रतिक एव च ॥ ११२ ॥

स्प०— [१०६] श्लोक १०६ के पश्चात् MS. में "तत्र नारदेन स्तोत्रयज्ञोपियोगितया०" इत्यादि वचन आये हैं, जो प्रथम क्र० ८७ से ८९ तक ऊपर उद्धृत किये हैं ।

M : १ सा २ ताना ३–रे– ४ विज्ञेयो ५ प्यष्टः ६–दोद्य ७ गिरे ८ श्न

[1]ब्रह्मचारिकनामा च प्राजापत्यभिधस्तथा ।
गौदानिको हयक्रान्तः स्यादजक्रा[2]न्त एव च ॥ ११३ ॥
विष्णुक्रान्तोऽरण्य[3]पत्रः कोकिलो जीवकस्तथा ।
ताना विंशतिरित्येते मध्यमग्राम-सम्भवाः ॥ ११४ ॥
तुम्बुरु[4]प्रिय-नामा च महालक्षण एव च ।
गन्धर्वानुमतश्चैव तथैवालम्बुषप्रियः ॥ ११५ ॥
नारदप्रिय-संज्ञोऽथ भीमसेनप्रियस्तथा ।
विनतश्चैव मातंगो भार्गवप्रिय एव च ॥ ११६ ॥
अभ्रागमोद्यसंस्तुत्यः किंनर[5]प्रिय-पुष्पकौ ।
मनोहरोऽथ विज्ञेयः कल्या[6]णकर एव च ।
तानाः पञ्चदशैवैते गान्धारग्राम-संश्रिताः ॥ ११७ ॥
तत्र षड्जग्रामे षाडव-चतुष्टयमौडव-त्रयं च ।
यथाऽऽह भरतः,

"षड्जर्[7]षभ-पञ्चम-निषादवर्ज्जीनाश्चत्वारः षाडवास्तानाः षड्ज-ग्रामे ॥ ११८ ॥"

षड्ज-पञ्चम-हीनम् । ऋषभ-पञ्चम-हीनम् । गान्धार-निषादवर्ज्जीनमित्यौडवत्र[8]यमिति ॥ ११९ ॥

मध्यमग्रामे तु षाडवत्रयमौडव-वर्ज्यं च । यथाऽऽह— "षडजर्षभ-गान्धार-हीनास्त्रयः षाडवास्तथा गान्धार-निषाद-वर्ज्जीनमृषभ-धैवत-हीन-मित्यौडव-द्वयमिति ॥ १२० ॥

अत्र नारदोक्त-मध्यमग्रामिकोक्त-विंशति-ताना निदर्श्यन्ते । तथा हि— षड्जहीने निरन्तरैकान्तर-विवादि-पुनरुक्त-योगास्त्रयस्ताना यथा— 'निरिगमधे'त्येकपादः । 'रिगमपधनी'ति वा[9]युः । 'गमपधनिरी'ति हि [10]दानः ॥ १२१ ॥

Ad: (१२०) B. २८।३६ pb.

M: १ जे- २ का- ३-श्र- ४ -र ५-रः ६-णः ७ ऋभस ८ त्रय ९ वा पुनः १० तारः

ऋषभ-हीने– ऋषभा.....देवाविरोधे चतुष्टयं नास्तीति पुनरुक्तैक-योगात्; तानषट्कमेव ॥ यथा–'मपधनिस[1] गे'त्य-ग्निष्टोमिकः । 'पधनिसगमे[2]'ति वाजपेयिकः । 'धनिसगमपे'ति पौण्डरीकः । 'नि[3]सगमपधे'ति चाश्वमेधिकः । 'सग[4]मपधनी'ति राजसूयः । 'गमपधनिसे'ति बहुसौवर्णिकः ॥ १२२ ॥

गान्धार-हीने स्वरेऽपि यथा 'मपधनिसरि[5]'त्यौपाधिकः । 'पधनिसरिम[6]' इति महाव्रतिकः । 'धनिसरिमप' इति ब्रह्म-चारिकः । 'निसरिमपध' इति प्राजापत्यः । 'सरिमपधनि' इति गौदानिकः । 'रिमपधनिस' इति हयक्रान्तः । एवं षाडवे पञ्चदश ॥ १२३ ॥

निषाद-गान्धार-हीनमौडवितं षड्जग्रामे भविष्यतीति पुनरुक्तत्वान्न कथितम् ॥ १२४ ॥

ऋषभ-धैवत-हीने तु पुनरुक्त-द्वय-योगात् पञ्च ताना यथा–'सगमप[7] नि' इति विष्णुः । 'गमप[8] निस' इति.... । 'मप[9] निसग' इति.... । 'पनिसगम' इति शारदः । निसगमप' इति विजयः । त इमे विंशतिर्मध्यम-तानाः ॥ १२५ ॥

अथ षड्जग्रामे । तत्र षड्जर्षभ-हीनं द्वयं मध्यमग्राम एवोक्तमतो नेह कथितम् । पञ्चम-हीने.....चैका पुन[10]र्विवादि-पुनरुक्तयोगो........मेव ॥ १२६ ॥

यथा–'गम[11] धनिसरि' इति प्रस्तारः । 'निसरिगम[12] ध' इति पैशाचः ॥ १२७ ॥

M : १ सरिग २ मपि ३ धनि ४ म ५ म ६ ग ७ ध ८ ध ९ ध १०–नरवि– ११ प १२ प

गान्धार-निषादवर्ज्जीनौडवे तु पुनरुक्त-परित्यागात् पञ्च तानाः । यथा—'सरिमपध' इति जीवकः । 'रिमपधस' इति सावित्रः । 'मपधसरि' इत्यर्धसावित्रः । 'पधसरिम' इति सर्वतोभद्रः । 'धसरिमप' इति सौवर्णः ॥ १२८ ॥

ननु षड्जर्षभ-हीन-षौडवयोर्मध्यमग्रामेण पुनरुक्तत्वात्कुत्र तानोपादानम्? म-हीन-षाडवान्तर-प्राप्त-नि-हीन-षाडव-कथने तु को हेतुः? उच्यते—खलु सम्भवादत्र तानोपादानम् । तथा सति गान्धारग्रामेऽप्येकादशौडव-कथन-प्रसङ्गः । किन्तूनपञ्चाशद्ये येषां नामानि त इमे समुदीरिता इति न दोषः ॥ १२९ ॥

अथवा यथोक्तं नारदीय-शिक्षा-विवरण-टीका-कृतानि नि-ग-हीनौडव-कृत-पञ्चानां नामानि नि-हीन-षाडव-कृत पञ्च-तानानामतो न पृथगभिधानमिति न दोषः ॥ १३० ॥

ऋषभ-धैवत-हीनौडवितानां न पृथगभिधानमिति न दोषोऽस्ति; पुनरुक्त-परित्यागात् ॥ १३१ ॥

पञ्च ताना यथा—'मपनिसग' इत्यजक्रान्तः । 'पनिसगम' इति विष्णुक्रान्तः । 'निसगमप' इति रक्तपत्रः । 'सगमपनि' इति कोकिलः । 'गमपनिस' इति जीवकः ॥ १३२ ॥

षड्ज-पञ्चम-हीने तु निरन्तरैकान्तर-विवादि-पुनरुक्त-त्यागात्तानद्वयमेव । यथा—'गमधनिरि' इति हंसः । 'निरि-

M: १ तरमा २–नः ३–स्य ४ षं– ५–६ क्व– ७ मात्रानु– ८ दशऊ–९–तं
१०–स्ति ११ म्यतो १२ भं १३ चम १४ तोनि १५–षः पि १६ योरंयमितः
१७ मी १८ ग १९–कानुरति २० मा २१ प २२–शः

गमध' इति..... । त एते षाडवौडवाभ्यां चतुर्दश तानाः षड्ज-ग्रामे ॥ १३३ ॥

अथ गान्धारग्रामे—धैवत-हीने तु पुनरुक्तैक-योगात् षट् तानाः । यथा—'गमप[1] निसरि' इति तुम्बुरप्रियः । 'मपनिसरिग' इति महालक्षणः । '[2]पनिसरिगम' इति गन्धर्वानुमतः । 'नि[3]सरिगमप' इत्यलम्बुषप्रियः । 'सरिगमप[4]नि' इति भीमसेन-प्रियः । 'रिगमप[5]नि' इति नारदप्रियः ॥ १३४ ॥

[5]षड्जर्षभ-हीने तु क्रमो दत्तोऽयं ग्राम इति नीच-स्वरः (?) । धैवत-तान-परि[6]त्यागात्तान-चतुष्टयमेव । यथा—'गमप-धनि' इति विनतः । 'मपधनिग' इति मातंगः । 'पधनिगम' इति भार्गवप्रियः । 'निगमपधृ' इत्य[7]भ्रागमः ॥ १३५ ॥

षड्ज-धैवत-हीनौडवेऽपि पञ्चैव । यथा—'गमप[8]निरि' इति संस्तुत्यः । 'मपनिरि[9]ग' इति किन्नरप्रियः । 'पनिरिगम' इति पुष्पकः । 'निरिगमप' इति मनोहरः । 'रि[10]गमपनि' इति कल्याणकरः । इत्येवमेता गान्धारग्रामे पञ्चदश तानाः ॥१३६॥

एवं ग्राम-त्रयेऽप्यूनपञ्चाशन्नारदोदिताः ।
तानाः प्रदर्शिताः सम्यगस्माभिर्नामतः पृथक् ॥१३७॥
सामगाने प्रयुज्यन्ते ताना यज्ञोपयोगिनः ।
गीतोपयोगिनस्ताना भरतेनोपदर्शिताः ॥ १३८ ॥
षड्ज-मध्यमयो......प्यनुक्रमात् ।
चत्वारस्त्रय इत्येवं भवेयुः सप्त षाडवाः ॥ १३९ ॥
षड्जेग्रामे तु षड्जेन पञ्चमेनर्षभेण च ।
निषादेन विहीनं च विज्ञेयं षाडवं बुधैः ॥ १४० ॥

M: १ ध २ स ३ पि ४ ध ५ खड्जऋव ६ या ७-त्यभागज्ञः ८ ध ९ म १० नि

मध्यमाख्ये तथा ग्रामे सरिगैस्तु त्रिभिः स्वरैः ।
प्रत्येकं सप्त तानास्तु कृत्वा संख्येति जायते ॥ १४१ ॥

तानानां तूनपञ्चाशद् ग्रामयोः षड्ज-मध्ययोः ।
औडवाश्चात्र पञ्चैव ग्रामयोरुभयोरपि ॥ १४२ ॥

षड्जेन पञ्चमेनाथ पञ्चमेनर्षभेण च ।
गान्धारेण निषादेन हीनमौडवित-त्रयम् ॥ १४३ ॥

षड्जग्रामे मध्यमाख्ये ग्रामे चौडवित-त्रयम् ।
विना निषाद-गान्धारौ स्वरावृषभ-धैवतौ ॥ १४४ ॥

प्रत्येकमौडवे सप्त तानाः कृत्वेह जायते ।
पञ्चत्रिंशत्तान-संख्या ग्रामयोरुभयोरपि ॥ १४५ ॥

एवं चतुरशीतिः स्युस्ताना भरत-संमताः ॥ १४६ ॥

— इत्यथ गान्धारग्रामेऽपि ब्रूमहे पुनः ।
कश्यपादि-मतेनात्र तानसंख्यामनुक्रमात् ॥ १४७ ॥

षड्जेन चर्षभेणाथ धैवतेन स्वरेण च ।
हीनं गान्धारग्रामेऽपि विज्ञेयं षाडव-त्रयम् ॥ १४८ ॥

षड्जर्षभौ स-धैवतौ गँनी चैवौडव-द्वयम् ।
कृत्वा सप्तैव तानाः स्युः प्रत्येकं षाडवौडवे ॥ १४९ ॥

पञ्चत्रिंशद्भवं तत्र ताना ग्रामेऽनुलोमतः ।
एवं ग्राम-त्रये एकोनविंशत्यधिकं शतम् ।
तानानामनुलोमेन ज्ञेयमेतन्मनीषिभिः ॥ १५० ॥

'तनु' विस्तार इत्यस्माद्धात्वर्थः कर्तरि स्मृतः ।
षड्जर्षभ-पञ्चम-निषादानां, षड्जर्षभ-गान्धाराणां

M: १ सूत- २ उं- ३ पादेनमौ- ४-५ ६ षड्ज ७ ध ८ ये ९-मेकम्

क्रमात् षड्जमध्यमग्रामयोः सप्त चौडवा........एकोनपञ्चाशत्सम्पद्यन्ते । एतदभिप्रायेण नारदाचार्येणाप्युक्तम् —

"तानाश्चैकोनपञ्चाशदित्येवं स्वरमण्डलम्" इति ।
(अन्ये तु) नामाभिप्रायेण चैतद्व्याचक्षते ।
"विंशतिर्मध्यमग्रामे षड्जग्रामे चतुर्दश ।
तानान्पञ्चदशेच्छन्ति गान्धारग्राममाश्रितान् ॥"
नामानि चाधुना वक्ष्याम्येतेषां ग्राम-भेदतः ॥ १५१ ॥

भरतेन तु षड्ज-पञ्चमाभ्यां निषाद-गान्धाराभ्यां विना षड्जग्रामे; ऋषभ-धैवताभ्यां निषाद-गान्धाराभ्यां विना मध्यमग्राम इति पञ्चौडवित-तानानां सप्तक-गुणनया पञ्चविंशतिरिति पूर्वाभिहितः पञ्चाशन् मिलिताश्चतुरशीतिरुपदर्शिताः । अस्माभिस्तु गान्धारग्रामस्या.....त-स्वरतायां काश्यपादिभी रागा अभ्यनुज्ञाता इति ग्रामत्रयेऽपि पूर्ण-षाडवौडविताविं........ताने विस्तर एव स्वीकृतः ॥१५२ ॥

यथा—

प-रि-हीनं स-प-त्यक्तं नि-ग-हीनमिति त्रयम् ।
औडवाः; षाडवाः षड्ज-पञ्चमर्षभ-सप्तमैः ॥ १५३ ॥
हीनाश्चत्वार एव स्युः षड्जग्राम-समुद्भवाः ॥
षड्जर्षभ-हीनं च त्यक्तं गान्धार-सप्तमम् ॥ १५४ ॥
औडव-द्वितयं, षड्ज-गान्धारर्षभ-वर्जितम् ।
औडव-त्रितयं च स्यान्मध्यमग्राम-सम्भवम् ॥ १५५ ॥
ध-हीनं षाडवश्चैको स-ग-हीनं ग-नि-च्युतम् ।
म-प-हीनं स-म-त्यक्तं रि-ध-हीनं ध-नि-च्युतम् ॥१५६

F: N. ३।२।४।८

स-प-हीनं ग-धापेतं प-ध-हीनं प-रि-च्युतम् ।
ध-नि-संत्यक्तमित्येकादश-संख्यानि सर्वदा ॥ १५७ ॥
गान्धारग्रामिकाश्चाहुरौडुविता मनीषिणः ।
गान्धारग्राम-वर्जं तु ग्रामयोरुभयोरपि ॥ १५८ ॥
षड्जादि-मध्यमादिश्च संख्या पूर्ण-स्वरे द्वयी ।
सम्पूर्ण-स्वर-पर्यन्तं तु पूर्वोक्त-स्वरादितः ॥ १५९ ॥
क्रमोक्तमविपर्यासात्तानसंख्या विधीयते ।
त्रिस्वरस्य प्रयोगे तु [1] दशोत्तरे[2]-शत-द्वयम् ॥ १६० ॥
चतुःस्वरेष्वपि ह्युक्तं सार्ध-शत-चतुष्टयम् ।
औडवेषु च विंशत्या प्रत्येकमधिकं शतम् ॥ १६१ ॥
तथा सप्तशतानीह विंशत्यभ्यधिकानि च ।
जायन्ते षड्विधास्तानावसूयप्रन्मता (?) ॥ १६२ ॥
पूर्णे पञ्च-सहस्राणि त्रयस्त्रिंशत्पराणि च ।
इति द्वि-त्रि-चतुर्योगे विज्ञेयं गान-योक्तृभिः ॥ १६३ ॥
एक-ग्रामेषु सहिता प्रोक्ता सप्त-शती मया ।
स्यादेकविंशतिः शती चतुर्विंशतिर्ग्रामगा[3] ।
ग्राम-त्रये च स्यात् पूर्व-संख्या त्रैगुण्य-योगतः ॥१६४॥
ग्राम-त्रये पौनरुक्त्या षाडवौडवितेष्वथ ।
........विंशतिः शती विंशत्यभ्यधिका सदा ॥ १६५ ॥
षाडवे चाष्टसु (?) ग्राम-त्रये पुनरुक्तितः ।
षष्ठ्यत्व – – भवेत्सप्त-पञ्चाशदधिका[4] तथा ॥ १६६ ॥
........धिका ज्ञेया दश-साहस्रिका यथा ।
पूर्ण-स्वर-प्रयोगे तु ग्राम-द्वय-समुद्भवा ॥ १६७ ॥

M: १ विपर्यासाद् २– रं ३ कामका ४ शतमभिध्यका

इति सप्तति-युक्ता स्यादष्टशती तैर्ह्यधिका ।
ऊनविंशतिः साहस्री तानाः स्युः समुदायतः ॥१६८॥

सम्प्राप्त-प्रतिराज-मण्डल-भयो मूर्च्छाल-कण्ठामर –
ग्रामोद्गीत-गुणोदयो दिशि दिशि प्रोत्ताल-दान-ध्वनिः
श्रुत्युत्कर्ष-कृतो नतित....धिया सुव्यक्त-बोधाप्तये ।
तानाध्यायमचीकरन्नरपतिः क्ष्मापालनारायणः ॥१७०

इति महासामन्ताधिपतिधर्मावलोक-श्रीमन्नान्यपति-
विरचिते सरस्वती-हृदयालङ्कारे तानाध्यायः
समाप्तः ॥

पञ्चमोऽलङ्काराध्यायः ।

१ अथ प्रथमं वर्णालङ्कार-प्रकरणम्

वर्णा एव हि जातीनां देहा इत्यभिधीयते ।
अलङ्काराय; तद्वक्ष्ये वर्णानामेव लक्षणम् ॥ १ ॥
आरोही चावरोही च स्थायि-सञ्चारिणौ तथा ।
वर्णाश्चत्वार एवैते ह्यलङ्कारास्तदाश्रयाः ॥ २ ॥
आरोहन्ति स्वरा यत्र ह्यारोहीति स कीर्तितः ।
यत्र चैवावरोहन्ति सोऽवरोहीति भण्यते ॥ ३ ॥
स्थिताः स्वरा समास्तत्र स्थायी वर्णः स उच्यते ।
सञ्चरन्ति स्वरा यत्र स सञ्चारीति कीर्तितः ॥ ४ ॥
सञ्चारि-स्वर-पर-भूताः(?) त्रिस्थान-स्वर-गाः.... ।
चत्वारो लपगोपेता ....त्येवं षोडश स्मृताः ॥ ५ ॥
"शशिना रहितेव निशा, विजलेव नदी, लता विपुष्पेव ।
अनलङ्कृतेव नारी गीतिरलङ्कार-शून्या स्यात्" ॥ ६ ॥
निष्कूजितः स[1]हुंकार-हसितो बिन्दुरेव च ।
प्रेङ्खोलितस्तथा क्षिप्तो विधु[2]तोद्वाहितौ तथा ॥ ७ ॥

टी०:—(१—१७) i. नान्यदेवोक्त अलंकारों की संख्या इस प्रकार होगी:—आरोही = १४; अवरोही = ५; स्थायी = ७; संचारी = १४ कुल मिलकर ४० होते हैं । तदुपरान्त सर्व-वर्णग १३ कहे हैं । अलंकारों के कतिपय नाम पुनरावर्तित होते हैं, उनको घटा देने से अलंकारों की वास्तविक संख्या ३३ हो जाती है, जो निम्नानुसार है:—

१ निष्कूजित, २ बिन्दु, ३ हुंकार, ४ हसित, ५ विधूत, ६ ह्लादमान, ७ प्रेङ्खोलित, ८ आक्षिप्त, ९ उद्वाहित, १० संप्रदान, ११ संधिप्रच्छादन,

---

Ad; (६) B. २९।४७

F. (७) M. १३०; B. २८।२७ का. pb: 'विधूमोद्घटितं'

M: १- मलंकार-सहितं २-घ्-

ह्लादमानः संप्रदानः सन्धिप्रच्छादनस्तथा ।
प्रसन्नादिः प्रसन्नान्तः प्रसन्नाद्यन्त एव च ।
.......................इत्यारोहे चतुर्दश ॥ ८ ॥

विधूतो गात्र[1]वर्णश्च तथोद्वाहित एव च ।
उद्गीतश्च तथा वे[2]णुर्विज्ञेयाश्चा[3]वरोहिषु ॥ ९ ॥

प्रसन्नादिः प्रसन्नान्तः प्रसन्नाद्यन्त एव च ।
°(प्रसन्नमध्यश्च तथा क्रम........एव च ।)
प्रस्तारश्च प्रसादश्च सप्तैते स्थायि-वर्णगाः ॥ १० ॥

---

१२ प्रसन्नादि, १३ प्रसन्नान्त, १४ प्रसन्नाद्यन्त, १५ प्रसन्नमध्य, १६ गात्रवर्ण, १७ प्रस्तार, १८ प्रसाद, १९ मन्द्र, २० कंपित, २१ सम, २२ कुहर २३ वेणु, २४ रंजित, २५ उपलोलक, २६ प्रावर्तक, २७ परावृत्त, २८ उद्गीत, २९ मन्द्रतार, ३० तारमन्द्र, ३१ क्रम, ३२ रेचित, ३३ संनिवृत्तःप्रवृत्त ।

ii. नाट्यशास्त्र में अलंकार-संख्या तैंतीस कही हैः—

'अलङ्कारास्त्रयस्त्रिंशदेवमेते मयोदिताः' (**का०**) । मतंग ने भी तेंतीस संख्या बतायी है तथा संदर्भ में भरत का श्लोक उद्धृत किया हैः—

'इदानीं सुप्रसिद्धास्त्रयस्त्रिंशदलङ्कारा नामतः प्रयोगतश्च कथ्यन्ते ।'

'अलङ्कारास्त्रयस्त्रिंशदेवमेते मयोदिताः ।
नोदिता अपि तेऽप्यत्र प्रत्येतव्या मनीषिभिः ॥ १७० ॥'

इस विषय में **ना० शा०** के अनेक श्लोक मतंग ने उद्धृत किये हैं, जो अधिक शुद्ध भी हैं ।

iii. **ना० शा०** के पाठभेद तथा अशुद्धि के कारण अलंकारों के कतिपय नाम प्रकारान्तर से दिये गये हैं, जैसा किः—निष्कूजित = निष्कर्ष; उद्गीत= ऊहित; उपलोलक = अवलोकित; अत्युच्चय, व्यालित, प्रस्तार इत्यादि ।

F: (९) B. २९।२९ का०; M: १३२
F: (१०) B. २९।२३, २४; M. १२५, १२६

M: १ नि २ केलि ३ ह्यचारिपु

मन्द्रस्तथा प्रसन्नादिः प्रेङ्खितो बिन्दुरेव च ।
सन्निवृत्तः प्रवृत्तश्च रेचितः कम्पितः समः ॥ ११ ॥
कुहर[1]श्चैव वेणुश्च[2] रञ्जितश्चोपलोल[3]कः ।
प्रावर्तकः परावृत्तः सञ्चा[4]रिणि चतुर्दश ॥ १२ ॥
प्रसन्नादिः प्रसन्नान्तो बिन्दुः कम्पित-रेचितौ ।
प्रेङ्खोलितस्तारमन्द्रो मन्द्रतारः समस्तथा ॥ १३ ॥
सन्निवृत्तः प्रवृत्तश्च प्रसादाख्यस्तथैव च ।
तथोप[5]लोलको वेणुरित्येते सर्ववर्णगाः ॥ १४ ॥

---

iv. रत्नाकर ने ६३ अलंकार इस प्रकार बताये हैं:— स्थायी ७ + आरोही १२ + अवरोही १२ + संचारी २५ + अन्य ७ = ६३ (१।६)

सामसंगीत में प्रयोज्य 'वर्ण' एवं कुछ गमकसदृश स्वर-योग पुष्पसूत्रादि ग्रंथों में कहे हैं, जिनमें से कुछ नीचे उद्धृत किये हैं:—

(१) **प्रत्युत्क्रमः**— स रे, रे ग, ग म, इ०

रत्नाकर ने इसको प्रेङ्खित नाम दिया है। इस प्रकार के स्वरयोग को पाश्चात्य संगीत में attack अथवा initial step कहते हैं। 'खटका' गमक में यह स्वरयोग प्रयोज्य होता है।

(२) **रोहः**— सरे; सरेग; सरेगम इ०; यह आरोही वर्ण होगा।

(३) **अतिक्रमः**— स-ग, स-म, स-प इ०

(४) **उद्घातः**— म गाऽ। पाश्चात्य संगीत में appoggiatura (downward) प्रयोग इसी के समान होता है।

F: (१२) B. २९।२५, २६ pb; B. १२८, १२९ pb.
(१३, १४) B. २९।३३, ३४ pb.; M. १३३, १३४

M: १-हु २-ध्व ३-केकः ४-स्का- ५- वलोकाका

यानि दैवताऽलङ्कार-भेद-जातानि तानि तु ।
योज्यानि सर्वगान्धर्वे सप्तगीतिषु जातिषु ॥ १५ ॥

यत्तु भरताचार्येणोक्तम्—

"सप्तरूप-गता ज्ञेया अलङ्कारा बुधैस्त्विमे ।
°(न नियोज्या ध्रुवास्वेते द्युति-वर्ण-प्रकर्षणात्) ॥ १६ ॥

तत्र सप्तरूप-शब्दः सकल-गान्धर्व-जात्युपलक्षणस्तथा हि सप्तरूप-गता ह्येवेति नियमादेव ध्रुवास्वलङ्कार-निषेधः सिद्ध एव करोति, तन्निषेधं च न नियोज्या ध्रुवास्विति द्युति-वर्ण-प्रकर्षणादित्येतदेवोपलक्षणे कारणमिति ॥१७॥

---

(५) **उद्ः**– ऊर्ध्वस्थ संवादी स्वर को उक्त संज्ञा दी गयी है ।

(६) **गतिः**– अक्षर को इ, ऊ स्वर लगाना; जैसा कि:– 'हो'= होइ होउ ।

(७) **अतिहारः**– मन्त्राक्षर को स्तोभाक्षरों द्वारा बढ़ाना, जैसा कि:– 'बर्हिषी' मन्त्र-शब्द है, उसके 'ब' को सामगान में 'बा औ होवा' किया जाता है, जो अतिहार ही है ।

(८) **कर्षणः**– मग, म ग रे, म ग रे स। यह स्वर-क्रिया 'मींड' के समान प्रतीत होती है ।

(९) **विनतः**– गा ऽ म, मा ऽ ग ।

(१०) **पर्वन्ः**–एक साथ गाया जा सके, ऐसा गान-विभाग (Phrase) । विशिष्ट अवरोही स्वर-युग्म को विनतादि संज्ञा दी गयी है:–

मग=विनत; गरे=प्रणत; सध=उत्स्वरित; गम=अभिगीत इ० ।

ना० शि० में गमकों का निर्देश उपलब्ध नहीं है । कानून-जातिक वीणा में गमकों के प्रयोग की गुंजाइश भी कम है ।

Ad: (१६) B. २९।३० pb.

M: १ धै-२ द्योद्या– ३ स्वरांशकाः ४ श्रुति–

२ अथ द्वितीयं गमक-प्रकरणम्

गमकानामतो वक्ष्ये नाम-लक्षण-संयुतम्।
स्फुरितं कम्पितं लीनं तिरिपान्दोलिते तथा॥ १८॥
आहतं च त्रिभिन्नं च गमकं नाम सप्तधा।
तारे मन्द्रे च दीप्ते च स्वर-स्थाने च युज्यते॥
स्वर-क्रमेण गृह्णीयादिदं गमक-लक्षणम्॥ १९॥
स्वरे स्वरे स्फुरेद्दीप्ते स्फुरितं गमकं च तत्।
त्रिस्थाने कम्पितो[1] यस्तु कम्पितो गमकः स्मृतः[2]॥ २०॥
तथा गति-समायुक्तो लीनं गमकमिष्यते।
सर्व-स्वर-सुसंवादी तिरिपो शीघ्रगः स्मृतः॥ २१॥

टी०ः—(१८–२३) i. नान्यदेव ने गमक ७ प्रकार के बताये हैं। गमकों का वर्णन **बृ० दे०** में उपलब्ध नहीं है। परन्तु बृ० दे० के राग-वर्णन में 'स्फुरित' गमक का निर्देश पृ० १२९ पर आया है। तदुपरान्त राग तथा प्रबन्धों के वर्णन में कहे हुए 'बिन्दु' एवं 'मूर्च्छना' दोनों गमक-प्रकार ही होंगे, ऐसा प्रतीत होता हैः—

'बिन्दुभिर्गमकैर्युक्ता चन्द्रिकेति प्रकीर्तिता॥ ४७९॥'
'पञ्च-पाद-समायुक्ता मूर्च्छना-गमकान्विता॥ ४८४॥'

ना० शा० में 'बिन्दु' धातु-प्रकारों में वर्णित हैः—

'गुर्वक्षर-कृता तन्त्री बिन्दुरित्यभिसंज्ञितः॥ २९।६९॥'

रत्नाकर द्वारा 'बिन्दु' एवं 'मूर्च्छना' प्राचीन-वीणा-वादन के प्रकरण में वर्णित हैं। (६।७८,८४) 'मूर्च्छना' प्रचलित 'घसीट' गमक के समान प्रतीत होता हैः—

'स्वर-स्थाने द्रुतं कम्प्रासारणं मूर्च्छना मता॥ ८४॥'

ii. **पार्श्वदेव** द्वारा कथित सप्त गमक नान्यदेवोक्त के अनुसार ही हैं (१।४७–५५)। गमक की रत्नाकरोक्त व्याख्या– 'स्वरस्य कम्पो गमकः श्रोतृ-चित्त-सुखावहः' (३।८७) सर्व-विदित है। **रत्नाकर** ने पन्द्रह गमक बताये हैं, उनमें अधिकांश गमक काल-मान द्वारा समझाये हैं। **सोमनाथ** ने उन्नीस गमक कहे हैं और उनकी क्रिया की रीति तथा स्वर-लेखन भी दिया है, जो

M: १ कथितो २ स्वरः

आन्दोलयेत् स्थितं नादं गमकं दोलितं च तत् ।
आहतं हन्ति यः सर्वान्स्वरान्शीघ्रं पुनः पुनः ॥ २२ ॥
स्थाने मन्द्रे ततस्तारे स्वर उद्दीपितस्तु सः ।
उद्दीप्यते च तत्स्थाने त्रिभिन्नं दुष्करं मतम् ॥ २३ ॥

३ अथ तृतीयं स्वर-जाति-रस-देवतादि-प्रकरणम्

रसाश्छन्दांसि देवाश्च ये चास्मिन्गीतके स्थिताः ।
स्वर-जात्यंशक-द्वारा[2] तानिदानीं प्रचक्ष्महे ॥ २४ ॥
मध्य-पञ्चम-भूयिष्ठं कार्यं शृङ्गार-हास्ययोः ।
षड्जर्षभ-प्रायमपि वीर-रौद्राद्भुतेषु च ॥ २५ ॥
गान्धार-सप्तम-प्रायं करुणेन गमिष्यते ।
तथा धैवत-भूयिष्ठं बीभत्से सभयानके ॥ २६ ॥

महत्त्वपूर्ण है। **सोमनाथ** द्वारा वर्णित बहुतांश गमक रत्नाकरोक्त के समान ही है। सोमनाथोक्त गमकों का विवेचन आर. **श्रीमन्** ने विस्तार-पूर्वक किया है। सोमनाथ ने कतिपय रागों के आलाप गमक-सहित लिख के बताये हैं। रत्नाकर-सोमनाथ द्वारा वर्णित गमक प्रचलित हिं० गमकों के समान ही हैं। **पार्श्वदेव** ने की हुई गमकों की व्याख्या नाविन्यपूर्ण है:--

'स्व-श्रुति-स्थान-सम्भूतां छायां श्रुत्यन्तराश्रयाम् ।
स्वरो यद् गमयेद् गीते गमकोऽसौ निरूपितः ॥ १।४७ ॥'

हिं० प्रचलित गमक लरजा (=कंप) मुर्की, जमजमा, मींड, छोटा-बडा 'गमक' खटका तथा घसीट आदि प्रसिद्ध हैं।

टी०:—(२४–२६) i. उपरोक्त वचन के अनुसार षड्जादि स्वरों से साहित्यिक रसों की अभिव्यक्ति निम्नप्रकार से होगी:—

स—रे	म—प	ग—नि	ध
वीर-रौद्र-अद्भुत	हास्य-शृंगार	करुण	बीभत्स-भयानक

F: (२५, २६) B. २९।१२, १३

M: १ मूर २–रावा

तत्र भूयिष्ठ-शब्देनार्थ-सिद्धोंऽशक एवाभिमतः ।
यो यत्रांशः स कलितच(?) भूयः प्रयोगवान्भवति ।
यत्रांश-स्वर-व्यक्ति-निरुक्तस्य क्वचिद्बाहुल्यमुक्तम् ।
तदितर-स्वरवदभिप्रायमतोंऽश-स्वर-द्वारेण रसव्यवस्था प्रसंगतो विधाय, क्वचिदपवादं क्वचिदनुवादमाह—
"षड्जोदीच्यवती चैव षड्जमध्या तथैव च ।
षड्ज-पञ्चम-बाहुल्यात्कार्यं शृङ्गार-हास्ययोः ॥ २७ ॥
षाड्जी तथार्षभी चैव स्व-स्वरांश-परिग्रहात् ।
वीर-रौद्राद्भुते नित्यं प्रयोज्या गान-योक्तृभिः ॥ २८ ॥

इसी अर्थ का रत्नाकर का श्लोक 'सरी वीरेऽद्भुते रौद्रे, धो बीभत्से भयानके ।' इत्यादि है (१।३।५९)। जाति-रागों के रस उनके अंश स्वरों के ऊपर अवलंबित होते हैः—'सर्वजातिषु जानीयादंशस्वरगतं रसम्'—**सं० र०** १।७।११२ ॥ अर्थात् 'यस्यां जातौ यदा योंऽशो भवति, तस्याम् 'सरी वीरे' इत्यादिनोक्त-प्रकारेण तत्तदंश-स्वर-गतं रसं विजानीयात् । ज्ञात्वा तत्तद्रसाभिव्यञ्जकैः पदैर्गायेदित्यर्थः ।' 'षाड्ज्यादि-सर्वजातिषु अंश-स्वर-गतो रसो वेदितव्यः ।' (१।७।६३—**क०**)

ii. मूल ष० ग्रामिक (या म० ग्रामिक) सप्तक द्वारा न्यास-परिवर्तन के कारण (श्रुतिपंडितों के मतानुसार 'मूर्च्छना'ओं के कारण) 'आर्षभी', 'गान्धारी' आदि जाति-रूप अन्य थाट उत्पन्न होते थे । उस समय ऐसे नये थाटों के स्वरों के नाम मूल ष० ग्रामिक या (म० ग्रामिक) ही रहते थे तथा इन नये थाटों के रस मूलग्रामिक स्वरों के अनुसार माने जाते थे, जैसा कि उपरोक्त "षड्जोदीच्यवती चैव०" (२९।१,२ **का०**) इत्यादि उद्धृत श्लोकों में भरतमुनि ने कहा है; परन्तु वास्तव में नये थाट के स्वरान्तर षड्ज-संचालन के कारण परिवर्तित हो जाते हैं, इसलिए मूल स्वरनाम के आधार पर उनके रस निर्धारित करना स्पष्टतः एक असंगति है । उदाहरणार्थः— काफी थाट में ऋषभ को वादी बनाकर गाने-बजाने से ऋषभ-गत वीर-रौद्र—रस की अनुभूति होगी, किन्तु काफी थाट के ऋषभ को षड्ज करने से भैरवी थाट की उत्पत्ति होती है, अतः षड्ज-भावी 'ऋषभ' के आधार पर इस भैरवी थाट का रस मूल ऋषभ-गत वीर-रौद्रादि

नैषादीत्यद्भुते कार्या निषादांश-परिग्रहात् ।
गान्धारांशोपपत्त्या च करुणे षड्जकैशिकी ॥ २९ ॥
धैवती धैवतांशत्वाद् बीभत्से च भयानके ।
गान्धारी रक्तगान्धारी गान्धारांशोपपत्तितः ।
करुणे तु रसे कार्या जातिर्गान्धर्व-वेदिभिः ॥ ३० ॥

मान लेना एक भूल होगी । जातिरूप ग्राम-सप्तक-जन्य थाटों के रस ग्रामिक मूल स्वर-नामों से प्राचीन शास्त्रकार निर्धारित करते थे, इसका दूसरा अर्थ यह निकल सकता है, कि षड्ज-संचालन से निकाले हुए नये थाटों का स्वतन्त्र व्यक्तित्व उस समय दृढ नहीं हुआ था, जिससे जन्य थाटों को मूल ग्रामिक सप्तक के अंश (विभाग) जैसा ही माना जाता होगा । संचालित षड्ज की 'अंश 'न्यास' आदि संज्ञाएँ इसी वस्तुस्थिति की ओर संकेत करती हैं । यही कारण होगा, कि जिससे ग्रामों का महत्त्व भी अत्यधिक माना जाता था । प्राचीन **ग्रीक** 'जाति' (=रागों) के विषय में भी विद्वानों की यही धारणा है:—

'......Let us again consider the essence of the distinction between these modes. It is not a distinction of modality such as exists between our major and minor scales. The development of Greek music preserved, amidst all its changes, the original tetrachord as the permanent unit of composition......... so that the principle of construction remained identical in the change of mode. Again, it is a distinction in the order of intervals, but only in so for as the several modes are different sections of one common whole.' (Artx., p. 39)

iii. प्राचीनों का ष० ग्रामिक थाट प्रचलित काफी जैसे ही मान लेने पर उस थाट के षड्ज, ऋषभ आदि स्वरों द्वारा उपरोक्त वचन में कहे हुए रस निष्पन्न हो सकते हैं, इसके अतिरिक्त इस थाट से निकलनेवाले प्रत्येक राग का एक स्वर जो वादी ('अंश'=प्रमुख) होगा, उसी के अनुसार रस भाव भी उत्पन्न होने चाहिए; किन्तु रागजन्य रस केवल एकमात्र वादी स्वर के ऊपर ही अवलंबित नहीं होता । बुलंद या मृदु आवाज, राग में प्रयुक्त होनेवाले गमक, राग के कोमल-तीव्र तथा वर्ज्यावर्ज्य स्वर, स्वरसंयोग, विलंबित आदि लय, लयकारी, बोलतानें, बोलबाँट, ख्याल-ठुमरी आदि प्रबंध-रचना इत्यादि के विशिष्ट प्रयोग से राग के निर्धारित रस का प्रकारान्तर अंशतः हो

मध्यमा पञ्चमी चैव नन्दयन्ती तथैव च।
मध्य-पञ्चम-बाहुल्यात्कार्या शृङ्गार-हास्ययोः ॥ ३१ ॥
मध्यमोदीच्यवा चैव गान्धारोदीच्यवा तथा।
द्वे षड्ज-पञ्चमाभ्यां तु वीर-रौद्रे प्रकीर्तिते ॥ ३२ ॥

सकता है। करुण-कोमल-प्रकृतिक भैरवी राग स्वर-चलन के अनुसार करुण, शृंगार अथवा वीर-हास्यादि विभिन्न रसों को अल्पाधिक निर्माण करता है, तथा उसे अनुभव भी किया जा सकता है।

iv. कोमल ऋषभ-धैवत एवं तीव्र मध्यम का रसकार्य जानने के लिए प्राचीन ग्रन्थों का आधार प्राप्त नहीं हो सकता। तीव्र गान्धार-निषादों का रस-परिणाम भरत ने स्वतंत्ररूप से नहीं कहा है। इसका कारण यह हो सकता है, कि भरतसंगीत में अंतर-काकली स्वरों का अस्तित्व स्वतंत्र नहीं था। तथापि—

v. काकल्यन्तर स्वरों के कारण अंश-गत रस विशेष बलवान् होते हैं, इस प्रकार के **भरत** के मन्तव्य की ओर निम्नोद्धृत वचन इंगित करता है:—

"सर्वेष्वंशेषु रसा नियम-विधानेन संप्रयोक्तव्याः।
काकल्यन्तर-विहिता विशेषयुक्तास्तु बलवन्तः ॥ २९।१५ ॥"

vi. प्राचीन, ग्रीक, ईरानी आदि संगीत में तथा प्रचलित पाश्चात्य संगीत में भी रागों द्वारा साहित्यिक रसों का निर्माण होता है, इस प्रकार की कल्पना प्रचलित थी तथा आज भी है (Artex., p. 39, 71; H., p. 180-185 Phymus., p. 187–181)

vii. राग-रस कल्पित हैं, ऐसा **हेल्महोल्ट्ज़** आदि का कथन है:—

'The whole matter is one of subjective imagination, possibly based in the first instance on association of ideas' (p. 184) अन्य विद्वान् अल्पस्वल्प मतभेद होते हुए भी हेल्महोल्टज से सहमत हैं :—

'Plato would have forbidden the use of the last two modes in his ideal republic......... It therefore seems wiser to assume, without being too dogmatic that the association of particular keys with music of particular type, and especially with familiar examples, has given rise to a belief in distinctive emotional characters for which there is in fact no rational foundation, although the possible associatiou with absolute pitch should not be entirely discounted' (Phymus., p. 181)

कार्मारवी तथा तथाऽऽन्ध्री च निषादांश-परिग्रहात्
वीराद्भुते तु कर्तव्ये नित्यं गान-प्रयोक्तृभिः ॥ ३३ ॥
कैशिकी धैवतांशत्वात्तथा गान्धार-पञ्चमी ।
प्रयोक्तव्या बुधैः सम्यग् बीभत्से सभयानके ॥ ३४ ॥

पाश्चात्य विद्वानों के यह निष्कर्ष हिं० राग-संगीत के लिए यथावत् ग्राह्य नहीं होंगे; इतना ही नहीं, परन्तु रागों द्वारा साहित्यिक 'रस' निर्माण नहीं होते हैं, ऐसा कतिपय भारतीय विद्वानों का भी कथन है। विशिष्ट राग द्वारा विशिष्ट 'रस' संपूर्णतः पैदा नहीं होता होगा, किन्तु—

viii. आधुनिक मनोवैज्ञानिकों ने अनेक प्रयोगों द्वारा सिद्ध किया है, कि कलाकार के हृदयस्थ भाव ही संगीत को निर्माण करते हैं तथा ऐसे संगीत द्वारा श्रोताओं के हृदय में वे ही भाव पैदा होते हैं; अर्थात् संगीत-जन्य रंजन अथवा आनंद इसी परिणाम का नाम है:—

'Music is essentially a play upon feeling. It is appreciated only in-so-far as it arouses feeling and can be expressed only by active feeling in music. On the degree and the kind of feeling, we may again classify persons into characteristic types in terms of affective responsiveness.' संगीत के यह भाव 'दिव्य' माने जाते हैं, किन्तु यथार्थ में वे मानवीय ही हैं। इन भावों की उच्चनीचता के साथ साथ अल्पाधिकता के ऊपर संगीतकारों की श्रेणी का क्रम लगाया जाता है। इनके अतिरिक्त अन्य दो विशेष भाव विचारणीय हैं, एक सृजनात्मक भाव और दूसरा कलात्मक अनुभवः—

"we are, of course not thinking here about mystic inner something which is spoken of as feeling, ae such, but of the expression of feeling. In modern psychology, to feel is always to do, to express something - action of the organism. The expression does not take ethereal, majical or even mystic form, but comes to us through the media to which our senses are open. There are two other aspects of feeling in music. One is the nature of esthetie experience, and the other is what we may call, 'The creative feeling' as it operates in the composer." संगीत के भावों का यह आविष्कार स्वर-ताल-रागों के दृढ नियमों के प्रति कलात्मकता से हेतुपुरस्सर विचलित होने पर

एकैव षड्जमध्या विज्ञेया सर्व-संश्रया जातिः।
अस्यास्त्वंशाः सर्वे स्वरास्तु विहिता प्रयोग-विधौ॥ ३५॥

ही निर्माण होता है:— " As a fundamental proposition we may say that the artistic expression of feeling in music consists in esthetic deviation from the regular - from pure tone from pitch, even dynamics, metronomic time, rigid rhythms, etc. .... The emotional medium at one moment may be primarily fine modulation in tonal timbre, at another in rhythms; at another in stress and each of these in countless forms of sublimation or hierarchies. In the ensemble of such deviation from the regular, lies the beauty, the charm, the grandeur of music." (Psymus., p. 9–10).

राग-भाववशात् स्वरस्थानों का सूक्ष्म उतार-चढाव को ही संगीतकार श्रुति' नाम से पहचनाते हैं। ऐसी श्रुतियों का निर्माण केवल संवादी गणितागत स्वरों द्वारा नहीं होता है, न उनकी संख्या भी २२ ही हो सकती है। तात्पर्य, संगीत की निर्मिति, स्वरूप तथा रसास्वाद में 'भाव' ही कारण होते हैं। इसी अर्थ में राग का अर्थ फॉक्स स्ट्रॅन्वेज ने colour और mood किया है। यद्यपि 'राग' शब्द का अर्थ 'रञ्जक स्वर-समुदाय' इस प्रकार मूलतः माना गया है, तथापि राग का आविष्कार अ-कलात्मक हो, तो वह अरंजक भी हो जाता है; जैसा कल्लिनाथ ने स्पष्ट किया है:– "राग-शब्दस्य केवल-रूढत्वं तु येन केनचिद् रागेण यः कश्चन न रज्यते तं प्रति तस्य अरञ्जकत्वात् 'अयं रागो मह्यं न रोचते' इति तद्वाक्यप्रयोगे द्रष्टव्यम् (२।१)" सारांश जिस शास्त्रोक्त संगीत द्वारा लोकरंजन नहीं होता है तथा जो भावपूर्व नहीं है, ऐसे संगीत को संगीत-विद्या कहना उचित होगा, संगीत कला नहीं! संगीतकार बनने के लिए आत्म-निवेदन का माध्यम एकमात्र संगीत होना अनिवार्य है; तदुपरान्त शास्त्र-ज्ञान, अभ्यास ('रियाज'), अनुभव, एवं कल्पनाशक्ति की आवश्यकता होती है। सांगीतिक बुद्धि—musical intelligence—गणित, विज्ञान आदि के समान ही होती है; परन्तु संगीत-कृति यदि केवल बुद्धिजन्य हो, तो उसे कला न कहते हुए संगीत कारीगरी कहना अधिक उचित होगा! संगीत में कल्पना imagination के स्थान पर यदि बुद्धि-पक्ष अधिक विकसित हुआ है, तो वह संगीत रूखा तथा कृत्रिम होकर परिणाम-कारक

F: (२५–३५) B. २९।१–१३

षड्जर्षभ-गान्धारास्तथा मध्यम-धैवतौ ।
पञ्चमश्च निषादश्च यत्रांशास्त्वेव संश्रिताः ॥ ३६ ॥

°(जातिषु छन्दसां योजना, यथा—)

गायत्र्यादि जगत्यन्तं तत्र छन्दः क्रमाद्भवेत् ।
एतत्तु वेद-विषयमन्यद् गान्धर्व-गोचरम् ॥ ३७ ॥
हीने गीत-[1]विहीनानि, मध्ये मध्यानि, चोत्तमे ।
उत्तमा[2]नि प्रयोज्या[3]नि छन्दांसीति मुनेर्मतम् ॥ ३८ ॥
विलम्बित-ल[4]गैश्चात्र [5]तुर्य-पर्यन्त-निर्मिते ।
गीते गुर्वक्षरं छन्दः प्रतिष्ठानं प्रशस्यते ॥ ३९ ॥
औडवादीनि गीतानि पूर्वाण्यन्यानि यानि च ।
लघु-प्रायाक्षरैः सम्यग् निर्मिते च [6]द्रुतैर्लगैः ॥ ४० ॥
गुरु-लघ्वक्षर-प्रायो मध्यमेऽप्य....लाच्च ।
गायत्र्यादीनि सर्वाणि तत्र छन्दांसि योजयेत् ॥ ४१ ॥
अपेक्षित-रसापेक्षं....यदि....स्यत्युदीरिताः ।
ध्रुवास्तत्र....छन्दांसि सदा नित्यं तमिष्यते (?) ॥ ४२ ॥

प्रतीत नहीं होता है। ऐसी गायकी को आजकाल 'बुद्धि-प्रधान' गायकी नाम देकर उसकी श्रेष्ठता सिद्ध करने के लिए तार्किक प्रयत्न हो रहे हैं। इसी प्रकार के 'तैयारी'–युक्त किन्तु रसहीन गायन को तज्ज्ञ लोग रियाज का गाना अथवा 'कसरत' (vocal gymnastics) नाम देते हैं। स्व-बुद्धि-कौशल-रहित केवल पायी हुई शिक्षा का यथातथा प्रदर्शन 'तालीम' का गाना कहा जाता है। दूसरों की नकल कर के गानेवाले गायकों को रत्नाकर ने 'अनुकार' नाम दिया है। केवल ताल और लयकारी का अंग प्रदर्शित करते रहने पर 'तबले का गाना' कहते हैं। रत्नाकर ने गायकों के पाँच प्रकार बताये हैं, जो लगभग ऐसे ही हैं:—

M: १-नि २-ने ३-ति ४ ग्रै- ५ स्तु= ६ हृतैर्लब्धै

'शिक्षाकारोऽनुकारश्च रसिको रञ्जकस्तथा।
भावुकश्चेति गीतज्ञः पञ्चधा गायनं जगुः॥ ३।२०॥'

इनके लक्षण पार्श्वदेव ने भी दिये हैं (८।५२–७२)। तात्पर्य 'रसिक' 'रंजक' और 'भावुक' ऐसे कलाकारों के तीन ही भेद हैं। संगीत-शिक्षकों की संज्ञा 'शिक्षाकार' है, जिनको प्रचलित में 'तालिमीये' कहते हैं। रत्नाकर ने रसहीन गायक को 'विरस' तथा कनसुरे गायक को 'विकल' कहा है।

राग-चित्रण की अपार क्षमता जिस कंठ में विनाभ्यास अर्थात् **निसर्गतः** रहती है, उसे रत्नाकर ने 'शारीर' संज्ञा दी है:–

'रागाभिव्यक्ति-शक्तमनभ्यासेऽपि यद् ध्वनेः।
तच्छारीरमिति प्रोक्तं शरीरेण सहोद्भवात्॥ ३।८२॥'

'शारीर' को प्रचार में 'सुरीले' शब्द से पहचानते हैं। 'शारीर' गुण के लक्षणों की स्पष्टता पार्श्वदेव ने की है (१।१६–१९)।

संगीत के कतिपय सौंदर्य-तत्त्वों का विश्लेषण-पूर्ण वर्णन रत्नाकर तथा पार्श्वदेव ने **स्थाय** प्रकरण में किया है। उदाहरणार्थः–

(१) '**ढालो** मुक्ताफलस्येव चलनं लुण्ठनात्मकम्॥ ३। ११३॥
....नमनं त्वतिकोमलं **लवनी**....॥
यत्तु कम्पनमारोहिण्यवरोहिणि वा भवेत्॥ ११४॥
वहनी साऽथ संचारिण्यपि वा स्थिर-कम्पनम्॥
यस्यामन्तर्विशन्तीव स्वराः **खुत्ते**ति सा मता॥ ११७॥
सो**त्फुल्ले**त्युदिता यस्यां निर्यान्तीवोपरि स्वराः॥ ११८॥
रागमग्ना वाद्य-शब्दा येषु ते **वाद्यशब्दजाः**॥ ११९॥
श्रुतिन्यूनाधिकत्वेन या स्वरान्तर-संश्रया॥ १२१॥
स्वरान्तरस्य रागे स्यात् **स्वरकाकु**रसौ मता।
या रागस्य निजच्छाया **रागकाकुं** तु तां विदुः॥ १२२॥
रागस्यातिशयाधानं प्रयत्नाद् **भजनं** मतम्॥ १२८॥
सविलासास्ति गीतस्य मत्त-मातंगवद् गतिः॥ १२९॥
तद्युक्तास्तु गतेः स्थायाः, स्निग्धो माधुर्यमांसलः।
बहुलो येषु नादः स्यात्ते **नाद**स्य प्रकीर्तिताः॥ १३०॥
युक्ताः कोमलया कान्त्या **छवेः** स्थाया निरूपिताः॥ १३१॥
रक्तेरुत्कर्षतो **रक्ते**रुक्ताः स्थाया मनीषिभिः।
द्रुतस्यान्वर्थ-नामानो **भृत**स्य भरणाद् ध्वनेः॥ १३२॥

रागान्तरस्यावयवो रागेंऽशः स च सप्तधा ॥ १३३ ॥
निकृतेः करुणायाश्च स्थायास्त्वन्वर्थ-नामकाः ॥ १४३ ॥
वहन्त इव कम्पन्ते स्वरा येषु **वहस्य** ते ।
अक्षराडम्बरो येषु मुख्यास्ते स्युस्तदन्विता ॥ १५२ ॥
वेगेन प्रेरितैरूर्ध्वं स्वरै**रुल्लासितो** मतः ।
यत्र गङ्गातरङ्गन्ति स्वराः स स्या**त्तरङ्गितः** ॥ १५३ ॥
परितोऽर्धभृते कुम्भे जलं डोलायते यथा ।....**सलम्बितः** ॥ १५४ ॥'

स्थायों का विवेचन पार्श्वदेव ने भी अच्छा किया है, जिसमें कतिपय मराठी शब्दों का उपयोग किया गया है :–

'ठायं यद् वेधकत्वेन क्रियते तद्विचक्षणैः ॥ २। ६६ ॥
चित्ताचे-ठायमुदितं श्रोतुश्चित्तानुवर्तनात् ।
करुणाराग-योगेन चिन्ता-दीनतयाऽथवा ॥ ६७ ॥
करुणा-काकु-संयुक्तां ठायं चेत्**करुणा**भिधम् ॥ ६८ ॥
भवेद् यत्र सुनादोऽन्ते तार-स्थान-गत-ध्वनैः ॥ ७१ ॥
सादाचे–ठाय इत्युक्तः स तु गीत-विचक्षणैः ॥ ७२ ॥'

इनमें 'चित्त,' 'करुणा' एवं 'साद' के ठाय अर्थात् स्थाय कहे हैं। 'सादाचे ठाय' को ही प्रचलित में **पुकार** की तानें कहते हैं। रत्नाकर ने मधुर सुरीले आवाज को असाधारण 'शारीर'–गुण कहा है:–

'शब्द-शारीर-गुणतः सुकरः सुस्वरोऽथवा ॥ १७३ ॥
यः कस्यचिन्न सर्वेषां सोऽसाधारण उच्यते ॥ १७४ ॥'

सिंहभूपाल द्वारा स्पष्टीकरण इस प्रकार है:–

'यस्तु कस्यचिदेव पुरुषस्य शब्द-गुणेन शारीरगुणेन वा सुकरः, सुखेन कर्तुं शक्यः स सुस्वरः; अपस्वर-हीनो वा; न तु सर्वेषां पुरुषाणां, सोऽसाधारणः।' इससे कह सकते हैं, कि सुरीले आवाजवाले गायक सभी युग में अपवाद-रूप ही होते हैं।

राग के प्रमुख स्वर-समुदाय को ही 'स्थाय' कहते हैं। गमक, स्वरों के गुण और लगाव, तानें तथा बोलतानें, श्रुति-रूप स्वर एवं राग-मिश्रण आदि सभी गायकी-क्रियाओं का समावेश स्थाय के अन्तर्गत होता है। संगीत के सौंदर्य-गुणों की समालोचना करने के लिए स्थाय-विवेचन अत्यंत उपयुक्त है। इस महत्त्व के विषय की ओर विद्वानों का ध्यान आकृष्ट करने के लिए हमने यह विस्तार किया है।

४ अथ चतुर्थं राग-देवता-कालादि-प्रकरणम्

देवतास्तत्र रागाणां गीते तूत्संगतः स्मृताः ।
कश्यपाद्यैः क्वचित्काश्चिन्नाम्नैव परिकीर्तिताः ॥ ४३ ॥
षड्जग्रामः सुरस्येष्टो, मध्यमे चैव माधवः ।
ग्रामे गान्धार-पूर्वे तु दैवतं पार्वतीपतिः ॥ ४४ ॥
इति सामान्यतः प्रोक्तं, विशेषादधुनोच्यते ।
टक्करागे स्मृतो रुद्रो, भिन्नषड्जे प्रजापतिः ॥ ४५ ॥
ककुभे धर्मराजस्तु, हिन्दोले मकरध्वजः ।
पञ्चमे पञ्चबाणस्तु, विष्णुर्मालवकैशिके ॥ ४६ ॥
षड्जग्रामाभिधे रागे देवता स्याद् बृहस्पतिः ।
ध्रुवस्तु मध्यमग्रामे, भार्गवः शुद्धषाडवे ॥ ४७ ॥
शनैश्चरः पञ्चमे च, सूरः साधारिते स्मृतः ।
मध्यमे कैशिके सोमो, लोहितः षड्ज-कैशिके ॥४८॥
राहुश्च देवता प्रोक्ता रागे गान्धारपञ्चमे ।
देवता केतुरेकस्तु स्मृता मालवपञ्चमे ॥ ४९ ॥
अनुक्त-देवतानां तु रागाणां दैवतं शिवः ॥ ५० ॥

यदाह मतंगः —
"सर्वे रागा महादेवे सम्यक् सन्तोषकारकाः" ॥५१॥
हेमन्त-ग्रीष्म-वर्षासु कालेषु गण-शासिभिः ।
षड्ज-मध्यम-गान्धार-ग्रामा गेया यथाक्रमम् ॥ ५२ ॥
हेमन्ते भिन्नषड्जाख्यः शिशिरे चैव कैशिकः ।
वसन्ते चैव हिन्दोलः, प्रेङ्खः कण्ठे (?) विगीयते ॥५३॥
पञ्चमो गीयते ग्रीष्मे मध्यमग्राम-नामकः, ।
अभ्रागमे षड्जग्रामष्टक्करागश्च गीयते ॥ ५४ ॥

M: १ गान्धारा २–वेष्टो ३–मलिय ४–सर्व– ५ ल– ६ सर्वे ७–इः ८ खङ्ग

ककुभः शुभमिच्छद्भिर्गेयस्तु शरदागमे ।
पूर्वाह्ने चैव मध्याह्ने चापराह्ने यथाक्रमम् ॥
ग्राम-त्रितयमेतत्तु गेयं श्रेयोऽभिवाञ्छता ॥ ५५ ॥
शुद्धा भिन्ना च या गीतिरायामे प्रथमे मता ।
मध्य-प्रहर-युग्मे च गौडी गीतिः प्रशस्यते ॥ ५६ ॥

°(अथ रागाणां रसेषु विनियोगो, यथा—)

हिन्दोलो मालवाख्यश्च शृङ्गार-रसमाश्रितौ ।
पञ्चमष्टक्करागस्तु वीर-रौद्रे यथाक्रमम् ॥ ५७ ॥
कारुण्ये ककुभश्चैव, हास्ये मालवकैशिकः ।
ककुभो भयानके कार्यः षड्जो बीभत्स-शान्तयोः ॥५८॥
एते रसाश्रिता रागा योज्याः सर्वत्र गीतके ।
प्रकरणार्थवशाद्वाऽपि, रागः पात्रानुरागतः ॥ ५९ ॥

५ अथ पञ्चमं पाठ्य-काकु-प्रकरणम्

यज्ञ-पाठ्येषु काकुः स्यात्तस्मात् स च ध्रुवां गतः ।
सामनि च लयाः प्रोक्ता इति सामान्य-लक्षणम् ॥६०॥
उच्चैः पाठ्यमृचां प्राहुरुच्चैः साम्नस्तु योजयेत् ।
उपाङ्गु (?) यजुषां च स्तुतौ पाठ्य-विनिश्चयः ॥ ६१ ॥
प्रेरेऽव्यष्य (?)कर्माणि शास्त्रे चम्पूष (?) कर्मणि ।
अत्रोदात्तः स्वरः कार्योऽनुदात्तो जपकर्मणि ॥ ६२ ॥

टी० :— (६० । १०८) वक्ता के मनोगत भावों के अनुरूप वाक्यों के स्वरों का चलन मन्द्र-तारादि स्थानों में होता है, स्वरों के उच्चार भी मृदु, कठोर, कंपित आदि होते हैं । इस प्रकार के भावाभिव्यञ्जक वाक्योच्चार को 'काकु' संज्ञा दी गयी है । 'काकुर्ध्वनेर्विकारः' (—क० ३ । १०४ १२७)। रत्नाकर ने स्वरकाकु, रागकाकु, यन्त्रकाकु आदि कही हैं ।

M: १ शिरपुंगमे २ पाडव -३ ज्ञः ४-त्ये ५ काः ६ यासच ७ ध्रुवागतः ८ समानिवलया ९ मृतां १० मामस्तु

पाठ्य[1]-गुणानिदानीं वक्ष्यामः । तद्यथा[2]—

सप्तस्वराः, त्रीणि स्थानानि, °(चत्वारो वर्णाः), द्विविधा काकुः, षडलङ्काराः, षडङ्गानि[3], इति ॥ ६३ ॥

त्रीणि स्थानानि तूरः, कण्ठः, शिर इति ।

प्रातःसवनमुरसा, कण्ठ्यं[4] माध्यंदिनं मतम् ॥

तृतीयं शिरसा योज्यं; त्रिविधं सवनं मतम् ॥ ६४ ॥

शारीर्यामथ[5] वीणायां त्रिभ्यः स्थानेभ्य एव तु ।

उरसः शिरसः कण्ठात्स्वर-काकुः प्रवर्तते ॥ ६५ ॥

आभाषणं तु दूरस्थे शिरसा संप्रयोजयेत् ।

नातिदूरे च कण्ठे च ह्युरसा चैव पार्श्वतः ॥ ६६ ॥

उरसोदाहृतं वाक्यं शिरसोद्दीपयेद् बुधः ।

कण्ठेन शमनं कार्यमर्थयोगेषु[6] सर्वदा ॥ ६७ ॥

उदात्तश्चानुदात्तश्च स्वरितः कम्पितस्तथा ।

वर्णाश्चत्वार एव स्युः पाठ्ययोगे च सर्वदा ॥ ६८ ॥

तत्र हास्य-शृङ्गारयोः स्वरितोदात्तैर्वीर-रौद्राद्भुतेषूदात्त-कम्पितैः करुण-बीभत्स-भयानकेष्वनुदात्त-स्वरितकम्पितैर्वर्णैः °(पाठ्यमुपपादयेदिति)। द्विविधा काकुः; साकाङ्क्षा, निराकाङ्क्षा च ॥ ६९ ॥

---

ii. मन्द्र-तारादि वाक्योच्चारों के अतिरिक्त शब्दोच्चारों के स्वरों में भावानुकूल चढ-उतार भी करने में आता है, यह चढ-उतार स्वर-मीलन (blending of notes) के रूप में अर्थात् मींड के रूप में किया जाता है। हमारे संगीत में प्रयुक्त होनेवाले सभी गमक इस प्रस्तुत शब्दोच्चार-जन्य स्वर-मीलन के परिणाम-रूप हैं।

F: (६३) B. १७।९९; (२५, २६) B. २९।१२, १३

M: १ यान्य २ तथा ३ षडानि ४ स्वक्त ५ सारीयामिथ ६ र्थं

अनियुक्तार्थकं वाक्यं साकाङ्क्षमिति संज्ञितम् ॥
नियुक्तं यद्भवेद्वाक्यं निराकाङ्क्षं तदुच्यते ॥ ७० ॥
°(अत्र साकाङ्क्षं मन्द्रादि-तारान्तम्) । अनियुक्तार्थमनिर्यातित-वर्णालङ्कारं कण्ठोरःस्थान-गतम् । निराकाङ्क्षं नाम नियुक्तार्थं निर्यातित-वर्णालङ्कारं शिरःस्थान-गतं मन्द्रादिना गतमिति ॥ ७१ ॥

°(अथ षडलङ्काराः ।)

उच्चो दीप्तश्च मन्द्रश्च नीचो द्रुत-विलम्बितौ ।
पाठ्यस्यैते ह्यलङ्कारा लक्षणं च निबोधत) ॥ ७२ ॥
उच्चो नाम शिरःस्थान............... ।
नीचो नाम उरःस्थान-गतो मन्द्रतरः स्वभावाभाषण-व्याधित-पथिश्रान्त-त्रस्त-पतित-मूर्च्छितादिषु ॥ ७३ ॥
ह्रस्वो नाम कण्ठ-गत-त्वरित-लज्जित-मन्मथ-भय-शीत-ज्वरार्त-त्रस्तात्यधिक-कार्य-वेदनादिषु । विलम्बितो नाम कण्ठ-स्थान-गतो मन्द्रः शृङ्गार-वितर्क-विचारामर्षासूयिताव्यक्तार्थ-प्रवाद-लज्जा-चिन्ता-विस्मित-तर्जनदोषानुकीर्तन-दीर्घ-रोग-निपीडनादिषु ॥ ७४ ॥

अत्रानुवंश्यां श्लोका भवन्ति—

उत्तरोत्तर-सञ्जल्पे परुषाक्षेपणे तथा ।
तीक्ष्ण-रूक्षाभिनयन आवेगे क्रन्दिते तथा ॥ ७५ ॥

---

iii. **दाक्षिणात्य संगीत में** 'ढालु' आदि सात गमक प्रचलित हैं, जिनका उच्चार भी हिन्दुस्तानी गमकों से भिन्न है। राग-चित्रण तथा गमकों के उच्चार इनकी भिन्नता के कारण दाक्षिणात्य संगीत की भिन्नता प्रतीत होती है। राग-संगीत का रस-परिणाम विलंबित आलाप एवं गमकों के प्रचुर प्रयोग के ऊपर निर्भर है। तानबाजी के गायन मे गमकों के प्रयोग के लिए अवकाश बहुत कम रहता है।

परोक्षावाहने चैव तर्जने त्रासने तथा ।
दूरस्थाभाषणे चैव तथा निर्भर्त्सनेषु च ॥ ७६ ॥
भावेष्वेतेषु हि नित्यं नाना-रस-समाश्रया ।
उच्चा दीप्ता द्रुता चैव काकुः कार्या प्रयोक्तृभिः ॥ ७७ ॥
व्याधिते च ज्वरार्ते च क्षोभे च क्षुत्पिपासिते ।
विषमस्थे वितर्के च गाढ-शस्त्र-क्षते तथा ॥ ७८ ॥
गूढार्थ-वचने[1] चैव चिन्तायां, तपसि स्थिते ।
मन्द्रा दीप्ता[2] च कर्तव्या काकुर्नाट्य[3]-प्रयोक्तृभिः ॥ ७९ ॥
मल्ले[4] च मर्दने[5] चैव भयार्ते, शीत-विप्लुते ।
मन्द्रा द्रुता च कर्तव्या काकुर्नाट्य-प्रयोक्तृभिः ॥ ८० ॥
दृष्टानष्टानुसरण[6] इष्टानिष्ट-श्रुतौ तथा ।
इष्टार्थाख्यापने चैव चिन्ता-ग्रस्ते तथैव च ॥ ८१ ॥
उन्मादेऽसूयने चैव ह्युपालम्भे तथैव च ।
अव्यक्तार्थे प्रवादे च तथायोगे तथैव च ॥ ८२ ॥
उत्तरोत्तर-सञ्जल्पे, कार्यातिशय-संयुते ।
..........................यिस्तेषूपपाद्यते ॥ ८३ ॥
...........क्रोधे, दुःख-शोके तथैव च ।
विस्मयामर्षयोश्चैव हर्षेष्वपरिवादिते ॥
विलम्बिता च दीप्ता च काकुर्मन्द्रा तु वै भवेत् ॥ ८४ ॥
यानि सौम्यार्थ-युक्तानि सुख[7]-भाव-कृतानि च ।
मन्द्रा विलम्बिता चैव तत्र काकुर्विधीयते ॥ ८५ ॥
यानि स्युस्तीक्ष्ण-रूक्षाणि दीप्त-मन्द्र-कृतेष्वपि ।
एवं नानाश्रयोपेतं पाठ्यं योज्यं मनीषिभिः ॥ ८६ ॥

F: (६५–८३) B. १७।१०१–११३

M: १ गुर्वाद्य– २ विस्थिता ३ नांध– ४ भाल्ल ५ मन्मय ६ तन्निष्टा ७ मुख–

°(अथ काकूनां रसेषु विनियोगो, यथा—)

हास्य-शृङ्गार-करुणेष्विष्टा काकुर्विलम्बिता ।
वीर-रौद्राद्भुतेषूच्चा दीप्ता चापि प्रशस्यते ॥ ८७ ॥
भयानके सबीभत्से द्रुता नीचा च कीर्तिता ।
एवं भाव-रसोपेता काकुः कार्या प्रयोक्तृभिः ॥ ८८ ॥

अथाङ्गानि—

विच्छेदोऽर्पणं विसर्गोऽनुबन्धो दीपनं प्रशमनमिति षडङ्गानि ॥ ८९ ॥ तत्र विच्छेदो नाम विरामकृतः । अर्पणं नाम लीलायमान-मधुर-वर्णेन[1] स्वरेण पूरयदिव रसं यत्पठ्यते ॥ ९० ॥ विसर्गो नाम वाक्यापन्यासः । अनुबन्धो नाम पदान्तरेषु विच्छेदोऽनुशासनं वा । दीपनं नाम त्रिस्थान-शोभि वर्धमानस्वरं च ॥ ९१ ॥ प्रशमनं नाम तार-गतानां स्वराणामविस्वरेणावतरण[2]मिति । एषां रस-गत-प्रयोगः ॥ ९२ ॥

तत्र हास्य-शृङ्गारयोरर्पण-विच्छेद-दीपन-प्रशमन-युक्तं °(पाठ्यं कार्यम्) । वीर-रौद्राद्भुतेषु विच्छेद-दीपनार्पणानुबन्ध-बहुलं पाठ्यं प्रयोज्यम् ॥ ९३ ॥

बीभत्स-भयानकयोर्विसर्ग-विच्छेदार्पण-प्रायमिति । सर्वेषां चैवेतेषां मन्द्र-तारस्य व्यवस्थया त्रिस्थान-गतः प्रयोगः । मन्द्र-तारं[3] गच्छेत्ताराद्वा मन्द्रमिति ॥ ९४ ॥ एषां च द्रुत-मध्य-विलम्बितास्त्रयो लयास्तेषूपपाद्याः । तद्यथा—

हास्य-शृङ्गारयोर्मध्य-लयः । करुणे विलम्बितः ।
वीर-रौद्राद्भुत-बीभत्स-भयानकेषु द्रुत इति ॥ ९५ ॥

F: (८४-८८) B. १७।१०१-१०८

M: १ वर्णेना २ स्वराणमेविस्वरेण- ३ न

अथ विरामः—

अर्थ-समाप्तौ काव्यवशान्न छन्दोवशात् । तस्माद् दृश्यन्ते हि एक-द्वि-त्रि-चतुरक्षरा विरामाः ॥ ९६ ॥

यथा—

किं, गच्छ, मा विश, सुदुर्जन, वारितोऽसि ।
कार्यं त्वया न मम, सर्व-जनोपभुक्तः ॥ ९७ ॥
सूचासुवां शरगते (?) तथोपचारे ।
स्वल्पाक्षराणि हि पदानि भवन्ति काव्ये ॥ ९८ ॥

एवं विरामे प्रयत्नोऽनुष्ठेयः, यस्माद् विरामो पूर्व-निदर्शकः । तथा हि—

विरामेषु प्रयत्नस्तु नित्यं कार्यः प्रयोक्तृभिः ।
कस्मादभिनयो ह्यस्मिन्नर्थापेक्षी यतः स्मृतः ॥ ९९ ॥
ये विरामाः स्मृता वृत्ते तेष्वलङ्कार इष्यते ।
समाप्तेऽर्थे, व्रीडिते च, व्यथिते...........॥ १०० ॥
विलम्बिते विरामे च गुरोर्यत्र भरो भवेत् ।
भाषाणामर्थयोगेन विरतौ विरमेद् बुधः ॥ १०१ ॥
एक-द्वि-त्रि-चतुः-पञ्च-षट्-कलं वा विलम्बनम् ।
षण्णां कलानां परतो विलम्बो न विधीयते ॥ १०२ ॥
अथवा कारणोपेतं प्रयोगं कार्यमेव च ।
समीक्ष्य वृत्ते कर्तव्या विरामा रस-भावतः ॥ १०३ ॥
ये विरामाः स्मृता वृत्त-काव्ये (पाद-)-समुद्भवाः ।
वक्रस्यापि क्रमं प्राज्ञैः कार्यास्तेऽर्थ-रसाश्रयाः ॥ १०४ ॥

नापशब्दं पठेत्तज्ज्ञो भिन्नवृत्तेऽपि चैव हि ।
विश्रमेत्तु विरामेषु, दैन्ये काकुं न दीपयेत् ॥ १०५ ॥
व्यपेतं काव्यदोषैस्तु लक्षणं च गुणान्वितम् ।
स्वरालङ्कार-संयुक्तं पठेत्पाठ्यं यथाविधि ॥ १०६ ॥
अलङ्कार–विरामाश्च ये पाठ्ये संस्कृते स्मृताः ।
त एव सर्वे कर्तव्याः स्त्रीणां पाठ्ये तु संस्कृते ॥ १०७ ॥
एवमेतत्स्वरकृतं कला-काल-लयान्वितम् ।
दश-रूप-विधाने तु पाठ्यं योज्यं प्रयोक्तृभिः ॥ १०८ ॥

६ अथ षष्ठं गीतिप्रकरणम्

...........षड्ज-मध्य-वर्णा (?) स्त्वेते प्रकीर्तिताः । अत्र वर्ण-शब्देन गीतिरभिधीयते । नाक्षर-विशेषाः । नापि षड्जादि-सप्त-स्वराः ॥ १०९ ॥ पद-गानेऽनियमादेव स्वेच्छया प्रयुज्यन्ते; षड्जादि-स्वरान्........ तानामप्यविशेषेण वावरोहादिधर्माणां प्रत्येव स्वोपलम्भात् । अतो वर्ण एव गीतिरवस्थितम् । साऽपि चतुर्विधा ॥ ११० ॥

तथा चाह भरतः,
"प्रथमा मागधी ज्ञेया, द्वितीया चार्धमागधी ।
संभाविता तृतीया च चतुर्थी पृथुला स्मृता" इति ॥ १११ ॥
त्रि-निवृत्ता प्रगीता या गीतिः सा मागधी स्मृता ।
एतल्लक्षणसम्बन्धादर्धतश्चार्धमागधी ॥ ११२ ॥

F: (८९-१०८) B. १७।११९-१३७ pb.
(११२) B.२९।४९ pb; M. १७२ pb.; (११३) B. २९।५०; M. १७४

Ad: (१११) B.२९।४८; M. १७१

M: १ तत्तत्र च त्रितिवृतिः

संभाविता तथा गीतिर्गुर्वक्षर-समन्विता ।
पृथुलाख्या तथा नित्यं लघ्वक्षर-समन्विता ॥ ११३ ॥

अनेन मागध्यर्धमागध्यौ, संभाविता, पृथुला च क्रमेण विवर्तिताः । दक्षिण-क्रमेण चित्र-वृत्तिर्दक्षिण-मार्गेषु प्रयोक्तव्या, इति दर्शयति; तथा च अन्यैरपि स्वीकृत-मेतत् ॥ ११४ ॥

यथा च—

"द्विगुरुर्द्विनिवृत्ता च चित्रे वृत्तिस्तु मागधी ।
लघु-प्लुताकृता चैव तदर्धे चार्धमागधी ॥ ११५ ॥
संभाविता गुरुर्वृत्तौ पृथुला दक्षिणे लघुः" इति ॥११६॥
आसां चतसृणामेव लघ्वादि-परिकल्पिताः ।
भेदाः प्रत्येकमन्येऽपि दृश्यन्ते पञ्चधा यथा ॥ ११७ ॥
गीतिः पञ्च-विधा तु ता निगदिता शुद्धा च भिन्नाभिधा।
गौडी स्यादथ वेसरा निगदिता साधारणाख्या तथा॥११८
शुद्धा स्यादृजुभिः स्वरैः सुललितैः श्लक्ष्णैस्तु वक्रैः
स्वरैर्भिन्ना, गौडभवा (सम-मृदुस्वरै-)—गीतिर्द्रुतै-
वेसरा ॥ ११९ ॥

एतासामेव गीतीनां लक्षणैरुपलक्षिता ।
साधारणाभिधाना च तज्ज्ञैर्गीतिरिहेष्यते ॥ १२० ॥

७ अथ सप्तमं वाद्यादि-स्वर-प्रकरणम्

अत्रैव स्वराणां साधारण्य-धर्म-प्राप्तावप्राप्ताव-
न्येऽपि चैतेषां धर्मा उच्यन्ते । यथोक्तम्—

Ad: (११५–११६) M. ११७–११८
(११५–११६) M. ११७–११८.

M: १ विवित्ति २ लसादि ३ दक्षुभिः ४ स च ५ स्वरेगीति द्रुतैर्वेसगा

" चतुर्विधत्वमेतेषां विज्ञेयं गान-योक्तृभिः ।
वादी चैवाथ[1] संवादी ह्य[2]नुवादी विवा[3]दिनः" इति ॥१२१
[4]तत्र यो यदांशत्वेनाभि[5]मतोऽपवाद-विषयमुत्सृज्य[6] ग्रहां-
शापन्यासेषु प्रायः[7] नियतावस्थितत्वेन प्रयोगे बाहुल्येन
प्रयुक्तो [8](भवति, स वादी, इत्युच्यते) ॥ १२२ ॥

श्रुति-मण्डले च नव-त्रयोदशान्तरौ परस्परं संवादना-
विति । तथैव द्विश्रुत्यन्तराः

षाडवौडविता अल्पत्वादिकरा [9]विवादिन इति ॥१२३॥
शेषा वादि-संवादि-विवादिनः[10], सस्खलितोच्चारणातुल्य-
धर्मिणो[11]ऽनुवादिन इति ॥ १२४ ॥

यथा—

सम्रौ[12] नि [13] सपौ रिधौ गरी म [14] स्वैरौ[15] ।
धनी रिगौ विवादिनौ; चतुर्दशानुवादिनः ॥ १२५ ॥

यथा—

समौ मनी सनी सधौ रिपौ रिमौ....।
रिनी गधौ गपौ गमौ [16] पनी स्वरौ ॥ १२६ ॥

तथा च भरतः,

"तत्र यो यत्रांशः स तत्र वादी । ययोश्च नव-त्रयो-दशकं परस्परतः श्रुत्यन्तरं तावन्योन्य-संवादिनौ; ययोश्च द्विश्रुतिकमन्तरं तौ विवादिनौ; शेषाश्चा[17]-नुवादिनः" इति ॥ १२७ ॥ नन्वेवं काकल्यन्तर-स्वर-प्रयोगेषु श्रुत्युत्कर्षान्नायं वाद्यादि-प्रकारो नियमितुं शक्यत, इति सूत्रेणैवाह—

M: १ -द्य २ हवि- ३-दिनात् ४ तत्तेयोर्यद् ५ निमभो- ६ स्व ७ प्रायसा ८-ति- ९ प्रवादिन १०-भिः ११-धर्माणानु १२-मा १३-तो १४-ती १५ श्व- १६ गमौ गधौ १७ चातुर्वादिन

" षड्ज-पञ्चमौ ऋषभ-धैवतौ गान्धार-निषादौ (षड्ज-मध्यमाविति षड्जग्रामे) । मध्यमग्रामेऽप्येवमेव (षड्ज-पञ्चम-वर्ज्यं) [1] पञ्चमर्षभयोश्चात्र-संवाद इति । ऋषभ-गान्धारौ धैवत-निषादाविति विवादिनौ । वादि-संवादि-विवा-दिषु प्रस्थापितेषु शेषा अनुवादिन " इति ॥ १२८ ॥

अयमेवार्थो दत्तिलाचार्येणाप्युक्तः, यथा—

" योऽत्यन्त-बहुलो यत्र वादी ब्रांशश्च तत्र सः ।
मिथः संवादिनौ ज्ञेयौ त्रयोदश-नवान्तरौ ॥ १२९ ॥
अतोऽनुवादिनः शेषा द्व्यन्तरौ तु विवादिनौ"
इति ॥ १३० ॥

८ अथ अष्टमं गेयपदादि-प्रकरणम्

गेयपदं स्थितं पाठ्यमासीनं पुष्पगण्डिका ।
प्रच्छेदकं द्विमूढकं प्रत्युक्तमुक्त-भाविके ॥ १३१ ॥
चित्रं पदं सैन्धवकमुत्तमोत्तमकं तथा ।
एते पाठ्य-विशेषास्तु शृङ्गार-रस-संश्रिताः ॥ १३२ ॥
शुष्कं यदासनस्थे तु गीयते गायनैः पदम् ।
वीणा-वेण्वादि-वाद्यं च तद्गेयपदमुच्यते ॥ १३३ ॥
पत्रावलं प्रिय गात्र शास्म (?)
संतप्त-गात्र लविका गाय-संस्था (?) ॥

टी० :– (१२८) काकल्यन्तरस्वरों द्वारा श्रुत्यन्तरों में परिवर्तन होता है । उसका स्पष्टीकरण करने हेतु नान्यदेव ने भरतवचन उद्धृत किया है, परन्तु फिर भी उससे मूल शंका का समाधान नहीं किया गया है ।

Ad: (१२९,१३०) D. १८, १९

F: (११७,११८) B. २८।२४,२५

M: १ षड्ज- २ विवादिनैरादि ३ वाहुश्च ४–हौ ५ मवान्तरौ ६ पूतो ७ द्यन्तरौ ८ णुर

यत्प्राकृतं पठति नायक-वर्णनाद्यम् ।
ख्यातं बुधैस्तदिह वैस्थि[1]तपाठ्य-संज्ञम् ॥ १३४ ॥
य[2]त्प्रोषित-प्रियतमा[3]नुगुणैक-चिन्ता- ।
संवेग-मन्थर-वि[4]कारमिहास्यते च ॥
निश्चेष्ट-गात्र-पणवादिक-वाद्य-हीनम् ।
आ[5]सीनपाठ्यमिति तत्प्रवदन्ति सन्तः ॥ १३५ ॥
गाथादि-वृत्त-परिपेशल-पा[6]ठ्य-युक्तम् ।
तद्वस्तु-वाद्य-महितं किल गीयते यत् ॥
भाषा-विमिश्रित-विचित्र-पदाभिरामम् ।
रामा वनाश्रयवती खलु पुष्पगण्डा ॥ १३६ ॥
कान्ते कृता मम (?) विशेष-गृहीतमन्यु[7]ः ।
शी[8]तांशु-सीकर-हता कलहान्तरा च ॥
या[9] सज्जते[10] प्रि[11]यकरे निरुदार-चित्ते[12] ।
प्राच्छेदिकं तदिह मान-विभेदि चो[13]क्तम् ॥ १३७ ॥
अनि[14]ष्ठुर-श्लक्ष्[15]ण-पदं, स्प[16]ष्ट-भावार्थ-वाचकम् ।
वर्ण्यमा[17]न-गुणोपे[18]तं, वृ[19]त्तालङ्कार-यो[20]जितम् ॥ १३८ ॥
ताल-मान-कलयोप[21]शोभितम् ।
वक्र-वाक्य-रचना[22]-विराजितम् ॥
वर्ण्यमान-गुण-कीर्तनोज्ज्वलम् ।
स[23]द्वितीयमिह मू[24]ढकं विदुः ॥ १३९ ॥

M: १ दिहपात्यमाङ्ग २ यत्तत् ३ षा ४ चिकेमिहा– ५ आसीदनपाद्य ६ पात्यय–
७ मान्यं ८ सीतांश ९ –ने १० यो ११ पिप्रवरे १२ नोतः १३ ने
१४ स्वरास्वर १५ क्ष १६ स्पृष्टो १७ –नु–गु– १८ प १९ स्वन्ता
२० सूचिकं २१ य २२ ली २३ तद्वि २४ –ट–

संकेतैर्विहितैर्विना गतवती प्रेयस्य पाल.... (?) ।
....सुबहुते प्राकृत-भाषया सपुरुया (?) विप्रलब्धाङ्गना ॥
सुव्यक्तैः करणैरुदार-मधुरै[1]रुद्भ्रान्त-चेष्टैरिदम् ।
प्राहुः सैन्धवकं सदा रस-विधि-ज्ञानैक-दक्षा जनाः ॥ १४० ॥

या खण्डिता [2]परुष-भेदक-वाक्य-युक्तम् ।
[3]आरुष्यति प्रियतमं रुचिरायताक्षी ॥
तं वल्लभं प्रणयव[4]त्पुरुषं पुनः सा ।
प्रत्युक्तमुक्तमिति तत्प्रवदन्ति सन्तः ॥ १४१ ॥

या नित्यं प्रिय-संगमोत्सुकमना कान्ता मनाऽहुतम् (?) ।
तं सख्यादिभिर्लिख्य पत्र-फलके चेतो विनोदार्थिनी ॥
ब्रूते किं [5] प्रौ[6]ढ-मन्मथमुपालम्भेन यद्वल्लभम् ।
त[7]च्चित्रं प[8]दमामन[9]न्ति सुधियः स्त्री-पाठ्य-योगे सदा ॥ १४२ ॥

स्वप्ने[10] स्वोदित-वल्लभा सरभसं बाहू प्रसार्यात्मनः
कान्तालिङ्गन-तत्परा सुमनसा संभोगमातन्वती ॥
[11]गत्वा मन्मथ-विह्वला सुविविधान्भावानसौ चेष्टते ।
प्रागल्भ्यं [12]गदितं स्वभाव-मधुरं तद्भाविकं [13]भावुकैः ॥ १४३ ॥

वृत्तैर्विचित्र-रचनैः समलङ्कृतं यद्
हेलादिभिः प्रकृतिजैः परिभूषितं च ।
स्वाधीन-नायकतया सुविचित्र-पाठ्यम्
अत्रोत्तमोत्तमकमाहुरिदं विदग्धाः ॥ १४४ ॥

